Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

y Sarayu Trust and eGangotri. Equipment: Heritage Foundatio

YOGINIHRIDAYA

TANTRA.

1

ur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, P

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

YOGINIHRIDAYA TANTRA.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

YOGINIHRIDAYA
TANTRA

With Yogini-hridaya-dipikā
Tikā by Amritānanda nāthā
shishya of Shrimat-parama yogindra
Punyānanda
copied by Pandit Hara bhatta Shāstri
Srinagar Kashmir (1917)

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ

श्रीयोगिनीहृदयम्

जगद्वन्द्यावेतौ गणपवटुकौ विश्वविनितौ
जगद्रक्षालीलौ जपनिरतसाहित्यवरदौ।
रथाङ्गे संनद्धौ रविशशिकृपाणूज्जयमौ
मयि स्यातां रक्षापरवशधियौ सद्गुरुमयौ ॥ १ ॥

यन्नित्यं ज्योतिषां ज्योतिर्जयत्येकमनुत्तरम्।
न तद्भासयते सूर्यो न शशाङ्को न तारकाः ॥ २
विमर्शरूपिणी शक्तिरस्य विश्वगुरोः परा।
परिस्फुरति सेकापि नानानामानुरूपिणी ॥ ३
पश्यन्त्यादिक्रमादेतौ जातौ प्रश्नोत्तरात्मना।
तन्त्रावतारौ तन्वाते सर्वत्रानुजिघृक्षया ॥ ४
तद्वामेश्वरके तन्त्रे सूचितार्थान् परापरान्।
व्यक्तीकर्तुं प्रयतते योगिनीहृदयेऽधुना ॥ ५
मानुषीहृदयं मर्त्यो वेत्ति नैकोऽपि तत्त्वतः।
योगिनीहृदयं ज्ञातुं कः समर्थः शिवं विना ॥ ६
अनन्योद्घाटितं दिव्यागमकोशगृहान्तरम्।
उद्घाटितं मयेदानीं महार्थो गृह्यतां बुधैः ॥ ७
तदनेकार्थसंदर्भं नानासंकेतसंकुलम्।
विवृणोम्यमृतानन्दः शिवयोरेव शासनात् ॥ ८ ॥

---

१ क० पु० वनितौ इति पाठः। २ क० पु० लीलौ इति पाठः
~~३ क० पु० वेतन~~
३ क० ख० पु० तद्वामकेश्वरे इति पाठः
४ ख० पु० उद्घाट्यते इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अन्यथानादिसंसारे केनेदं व्याकृतं पुरा ।
तदा न सन्ति सन्तः किं किं वा नात्र प्रयोजनम् ॥ ९ ॥
शिवादिगुरुपर्यन्तपारम्पर्यक्रमागतम् ।
एतज्ज्ञानं मया लब्धमक्रमाणामगोचरम् ॥ १० ॥

इह खलु भगवान् प्रकाशमूर्त्तिः परमशिवः स्वात्मानं विमर्शांशेन विभज्य पश्यन्त्यादिक्रमात् पृच्छति श्रीदेव्युवाच इति शिव एव अहं वैखरीपर्यन्तं व्याप्य पृत्य विमर्शमेव पृष्टवान् इति यावत् । उवाच इति लिङुत्तमपुरुषस्यैकवचनं । भूतत्वं च वक्तव्यस्य अनद्यतनत्वात्, अनद्यतनत्वमकालकलितत्वात्, परोक्षत्वमनिन्द्रियगोचरत्वात् । अनेन च श्रीभैरव उवाच इत्येतदपि व्याख्यातम् । प्रकाशात्मकः परमशिवोऽहमेव विश्वानुग्रहपरः परापश्यन्तीमध्यमावैखरीक्रमेण व्याप्य[1] अन्यविमर्शांशेन प्रतिवचनदातापि सन् तन्त्रं समवतारयामीत्यर्थः । तदुक्तं महास्वच्छन्दे

"गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
पूर्वोत्तरैः पदैर्वाक्यैस्तन्त्रं समवतारयेत्[3] ॥"

इति ॥

देवदेव महादेव परिपूर्णप्रथामय ।
वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थस्त्वनेकशः ॥ १ ॥
तांस्तान् अर्थानशेषेण वक्तुमर्हसि भैरव ॥

१ क० पु० व्याप्येति पाठः । २ क० पु० प्रष्टा भूत्वा प्रकाशांशेनेति नास्ति ।
३ क० पु० समवतारयदिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विश्वस्य भरणात् रमणात् वमनात् स्थितिसंहारसृष्टिकारी भैरवः। देवदेवेति देवा द्योतनात्मानो रव्यादयः तेषां देवः प्रकाशको महादेव महाप्रकाशात्मन्। अयमर्थः तव महाप्रकाशात्मकत्वात् त्वमेव विश्वं भासयसि न त्वां कोऽपि भासयितुमलम् इति। तत्र श्रुतिः

"न तत्र सूर्यो भाति न चन्द्रतारका
नेमा विद्युतो भाति कुतोऽयमग्निः।
तमेव भान्तमनु भाति सर्वं
तस्य भासा सर्वमिदं विभाति॥"

इति। परिपूर्णप्रथामय प्रथा ज्ञानं परिपूर्णप्रथा विश्वविषयिणी ज्ञप्तिः तन्मय तद्रूप, तव सर्वज्ञत्वात् त्वमेव सर्वान् बोधयितुमर्हसि न त्वां कोऽपि बोधयितुमलमिति। अतो वामकेश्वरतन्त्रे चतुःशतीशास्त्रे अज्ञातार्था अविदितार्था बहवः सन्तीत्यर्थः। तान् तान् अशेषेण साकल्येन वक्तुं व्यक्तीकर्तुमर्हसि मम विमर्शपदवीं प्रापयितुमर्हसीत्यर्थः॥

प्रकाशांशेन प्रतिवदति श्रीभैरव उवाच

शृणु देवि महागुह्यं योगिनीहृदयं परम्।२॥
त्वत्प्रीत्या कथयाम्यद्य गोपितव्यं विशेषतः॥

। देवि विश्वसर्जनादिव्यवहारक्रीडापरे हे विमर्शविग्रहे परे महागुह्यं लोके गोपनीयं यद्वस्तु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यावत्तावत्कालम् अतीन्द्रियगोचरं भवति, यस्य तु सर्वदा मनोवागिन्द्रियातीतत्वात् महागुह्यत्वं योगिनीहृदयं योगिन्याः संविदो हृदयमिव आविर्भावभूमित्वात् हृदयम्। अत्र तु योगो नाम सर्ववस्तुसमवायसम्बन्धः तेन भासते इति योगिनी। तदुक्तमभियुक्तैः

"देशकालपदार्थात्म यद्यद्वस्तु यथा यथा।
तत्तद्रूपेण या भाति तां अहं संविदं कलाम्॥"

इति। परमुत्कृष्टं सर्वज्ञानोत्तरत्वात् अत एव वक्ष्यति

"एतज्ज्ञात्वा वरारोहे सद्यः खेचरतां व्रजेत्।"

इति। एतत् परम् विमर्शपदवीं प्रापय त्वत्प्रीत्या त्वदैकान्त्यहेतोः कथयामि अन्यस्मै पुरा न कस्मिंचिदाख्यातम् अतिरहस्यत्वात् अतो विशेषतो गोपितव्यम् आत्माहंभावभावनया भावयितव्यमित्यर्थः॥

अत्यन्तगोपनीयतामेव द्रढयितुमाह

कर्णात्कर्णोपदेशेन संप्राप्तमवनीतलम्॥३॥

कर्णात् कर्मणि स्यप्लोपे पञ्चमी। कर्णं प्राप्य पुनः कर्ण एव उपदेशक्रमेणैव पारम्पर्यक्रमेण संप्राप्तम्। आदिकर्मणि क्तः। अवनीतलग्रहणेन तत्रस्था मनुष्या लक्ष्यन्ते यथा मर्त्याः क्रीडन्तीति, तेनायमर्थः संपद्यते दिव्यसिद्धमानवक्रमेण अ-

१ ख० पु० यद्यत् तथा इति पाठः। २ ख० पु० ~~अन्य~~ परामिति पाठः।
३ ख० पु० त्वदेकस्यै हेतोरिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तिरहस्यत्वात् कर्णपरम्परामात्रगम्यमेव इदमिति अत्र मानवग्रहणं सिद्धदिव्यानामुपलक्षणार्थम् ॥ २ ॥

अनर्हेभ्यो न देयमित्याह

न देयं परशिष्येभ्यो नास्तिकेभ्यो नचेश्वरि ।
नाशुश्रूषारतानां च नैवानर्थप्रदायिनाम् ॥

परशिष्येभ्य इति परशिष्या एव के येभ्यो न देयमित्यत आह ये विद्यान्तरेषु पारम्पर्येणाधिगतापोद्धरहस्यपरमार्था अप्राप्तसंपूर्णाभिषेकाश्च ते परशिष्याः तेभ्यो न देयं तैरपि न ग्राह्यं । ये नेतादृशाः[1] न ते परशिष्याः तेभ्यो देयं तैरपि ग्राह्यम् ।

"गन्धलुब्धो यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत् ।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ॥"

इति वचनात् न ते परशिष्याः

"पूर्णाभिषेककर्ता यो गुरुस्तस्यैव पादुकाम् ।"

इति वचनात् । नास्तिकेभ्य इति नास्ति परलोकः इति ये मन्वते ते नास्तिकाः श्रद्धाविहीना धनधान्याद्यपेक्षया तेषां हविमुत्पाद्य न देयमित्यर्थः । तदुक्तं भगवद्गीतायाम्

"न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥"

---

१ ख० मु० नेदृशा इति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति । नाशुश्रूषारतानां चेति ये शुश्रूषालसास्तेभ्यो न देयम् । नैवानर्थप्रदाविनामिति । शुश्रूषालसाश्च धनं न वितरन्ति तेभ्यो न देयमित्यर्थः । तदुक्तम्

"गुरुशुश्रूषया वापि मुक्तलेन धनेन वा ।
अथ विद्यया विद्या चतुर्थी नोपपद्यते ॥"

इति ॥

परीक्षार्हाय देयमित्याह

परीक्षिताय दातव्यं वत्सरार्धोषिताय च ।

परशिष्यत्वादिदोषपरीक्षणं वत्सरार्धेन सहवासेन कर्तुं शक्यते गुरोर्विवेकित्वात् ॥

उक्तार्थमेव दृढयन् शिष्यप्रवृत्तये फलमाह

एतज्ज्ञात्वा वरारोहे सद्यः खेचरतां व्रजेत् ॥

अस्य तु महार्थत्वात् परीक्षिताय देयम् एतस्य परिज्ञानेनैव शिष्यः खेचरतां खे व्योम्नि चरतीति खेचरः परमशिवः । तदुक्तं चिद्गगनचन्द्रिकायाम्

"दृक्क्रियात्मपदार्शिभानुमध्यगः
खे चरत्यनलदृष्टिधाम यः ।
यत् तदूर्ध्वशिवरं परं नभ-
स्तत्र दर्शय शिवं त्वमम्बिके ॥"

इति । सद्यः तत्त्वं व्रजेत् जीवन्मुक्तो व्रजेदित्यर्थः । तदुक्तं वेदरहस्ये

"तस्यैवात्मा पवित्रं विदित्वा
न कर्मणा लिप्यते पातकेन ।"

इति ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शास्त्रमारभते

चक्रसंकेतको मन्त्रपूजासंकेतकस्तथा ।
त्रिविधस्त्रिपुरादेव्याः संकेतः परमेश्वरी ॥

क:/ संकेतवत् संकेतः संकेतः समयः यथा कृतस-
मयौ कामिनीकामुकौ यत्र क्वापि निवसतः एव-
मस्मिन् शिवौ इति चक्रसंकेतः मन्त्रसंकेतः पूजा- क:/
क:/ संकेतश्च । एवं त्रिविधः संकेतः त्रिपुरादेव्या धामत-
त्त्वपीठलिङ्ग-मातृकादिभ्यः त्रिभ्योऽपि पुरा या वि-
द्यते सा देवी प्रकाशविमर्शसामरस्यरूपिणी परा
अस्याः त्रिविधः संकेतः । परमेश्वरीति परममुत्कृष्ट-
म् इन्द्रियादिभिरपि परिपाल्यमानमैश्वर्यमाज्ञा यस्याः
तदुक्तं वेदरहस्ये

"भीषास्माद्वातः पवते भीषोदेति सूर्यः ।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥"

इति ॥

एतज्ज्ञानविहीनस्य फलवैपरीत्यमाह

यावदेतन्न जानाति संकेतत्रयमुत्तमम् ।
न तावत्त्रिपुराचक्रे परमाज्ञाधरो भवेत् ॥

यावत् एतत् वक्ष्यमाणसंकेतत्रयं यो न जानाति
स तावत् त्रिपुरायाः परायाः स्वसंविदः चक्रे मा-
तृमानमेयलक्षणे तत्त्वसमूहे परमाज्ञाधरो न भवेत्
आज्ञा नाम निग्रहानुग्रहसामर्थ्यम् तत् राज्ञामपि
लोकेऽस्ति इत्यतः[1] परमेति । परमा सर्वलोकेषु अप्र-

१ ख० पु० स इति तदुच्यते परमेति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

निह्नता परमेश्वरस्यैव परमाज्ञाधरः परमेश्वरो न भवेत्[१] य एतत् विजानाति सद्यः खेचरतां व्रजेत् यो नैतत् विजानाति न तद्भावं व्रजेत् इत्यन्वयव्यतिरेकसिद्धमित्यर्थः। अत्रेतत् प्रयोजनकीर्तनम् अधिकारिविषयसंबन्धानामपि उपलक्षणं। मुमुक्षुरधिकारी, स्वसंविद्दैवता विषयः, मोक्षः प्रयोजनं, प्रतिपाद्यप्रतिपादकभावः संबन्धः॥

अत्रादौ चक्रसंकेतं वक्तुमुपक्रमते

नच्छक्तिपञ्चकं हृद्या लघेनाग्निचतुष्टयम्।
पञ्चप्राक्तिचतुर्वह्निसंयोगाच्चक्रसंभवः॥

नच्चक्रं हृद्या हृष्टिक्रमेण प्राक्तिपञ्चकं स्वाभिमुखाग्रत्रिकोणं प्राक्तिरुच्यते। नाडृशं प्राक्तिपञ्चकं लघेन अग्निचतुष्टयं लघेन संहारहृपेणाग्निः पराङ्मुखाग्रत्रिकोणम् अग्निरुच्यते नच्चतुष्टयम्। एवं पञ्चप्राक्तीनां चतुर्वह्नीनां संयोगात् सम्यक् योगः संयोगः [illegible]

प्राक्त्या प्राक्तिं विनिर्भेद्य ·····।

इत्यादिचतुःप्रतीपास्त्रोक्तरीत्या ग्रन्थिभेदक्रमेण समत्रिकोणप्राक्त्यग्रं समरेखं यथा भवति तथा लेखनं संयोगः तस्मात् चक्रस्य संभवो भवति॥ सामान्यतः चक्रसमुदायमुत्पाद्य इदानीमवयवप्राः संभवं प्रतिजानाति

एतच्चक्रावतारं तु कथयामि तवानघे।

---

१ क० पु० न भवेदिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एतस्य श्रीमहात्रिपुरसुन्दर्याः चक्रस्य पूजाक्रमस्य[1] अवतारम् अवतारो नाम लोके सौधाद्युन्नतप्रदेशात् निम्नदेशे प्राप्तिः। अत्र तु विश्वोत्तरात् प्रकाशात्मनः परशिवात् तत्त्वक्रमेण प्रसरः तादृशं चक्रावतारम्[2] अनघे परशिष्यत्वादिदोषरहिते तव प्रकाशात्मनो ममांशभूतायाः विमर्शशक्तेः कथयामि ॥

कथमक्रियात्म[3]परमशिवात् तत्त्वमयं चक्रं संभवतीत्याह

यदा सा परमा शक्तिः स्वेच्छया विश्वरूपिणी।
स्फुरत्तामात्मनः पश्येत् तदा चक्रस्य संभवः॥

यदा यस्मिन् काले प्राणिनामदृष्टवशात् स्वान्तःसंहृतविश्वसिसृक्षया सैव पराशक्तिः विमर्शरूपिणी स्वेच्छया विश्वरूपिणी विश्वं सृजति शिवस्तु तटस्थं उदासीन इत्यर्थः। अत्र च श्रुतिः

"न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविके ज्ञानबलक्रियाबले॥"

इति। आज्ञावतारेपि उक्तम्

"स्वेच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपि।"

इति विश्वमेव[4] पराशक्तेः स्फुरत्ता सृष्टिक्रमत्वात् तदा षट्त्रिंशत्तत्त्वात्मकविश्वसृष्टिकाले चक्रस्य

---

१ ख० पु० पूजाचक्रस्येति पाठः। २ ख० पु० चक्राकारमिति पाठः।
३ क० पु० अक्रियात्मेति पाठः। ४ क० पु० विश्वमेवेति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

परदेवताचक्रस्य विश्वमयस्य संभवः ॥

एतदेवाह

शून्याकाराद्विसर्गाद्विन्दुप्रस्पन्दसंविदः । त्ता(
प्रसारपरमार्थत्वात् स्फुरत्तात्लहरीयुतात् ॥
प्रभूतं विश्वलहरीस्थानं मातृत्रयान्वितम् ।
बैन्दवं चक्रमेतस्य त्रिरूपत्वं पुनर्भवेत् ॥

बैन्दवं चक्रमिति शून्यश्चासावकारश्चेति शून्याकारः । शून्यत्वं पुनरत्र निरस्तनिखिलप्रपञ्चत्वात् अत एव परमशिवः । तदुक्तं संकेतपद्धत्याम्

"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।"

इति । अत्र श्रुतिः "अ इति ब्रह्मेति" । विसर्गान्तात् विसर्गोऽन्ते यस्य तस्मात् विसर्गान्तात् बिन्दुप्रस्पन्दसंविदः बिन्दुरग्नीषोमात्मकः कामाख्यो रविः शिवशक्तिसामरस्यात्मकामाख्यो[१] जातः । तदुक्तं चिद्गगनचन्द्रिकायाम् वाच्यो(

"भोक्तृभोगमयगो विसर्गगो
देवि सां विदुदधेर्दृशां दशाम् ।
अर्पयन्ननलसोममिश्रण-
तद्विमर्श इह भानुजृम्भणः ॥"

इति । शिवशक्तिसामरस्यरूपकामाख्या संस्कारः प्रस्पन्दः दहनेन्दुरूपसितशोणबिन्दुद्वयात्मकः अकारहकारसामरस्यबिन्दोः प्रस्पन्दात् दहनेन्दुरूपसितशोणबिन्दुयुगलात् संवित् चिन्मयी दहनेन्दुरूपा कला जाता इत्यर्थः । प्रसारपरमार्थत्वात् स्फुर-

---

१ क० पु० त्ता कामाख्य इति पाठः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्तालहरीयुतात् स्फुरत्ताया विमर्शशक्तेः लहरी बिन्दुद्वयान्तरालमिश्रितहार्धकलारूपा तया युक्तात् एवंभूतात् कामकलाक्षरात् प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकं[1] बैन्दवं चक्रं विश्वलहरीस्थानं, विश्वलहर्यो वीचयः षट्त्रिंशत्तत्त्वरूपाः, तासां स्थानमुत्पत्तिहेतुत्वात् मातृत्रयान्वितं पश्यन्ती-मध्यमावैखरीरूपम्, एवं तत्समष्टिरूपपरात्मक-सदाशिवाख्यतुरीयबिन्दोः उत्पन्नत्वात् बैन्दवं चक्रं मध्यत्रिकोणं प्रसृतम्। एतदत्र वक्ष्यति "आत्मनः स्फुरणं पश्येत्" इत्यादि "वैखरी विश्वविग्रहा" इत्यन्तेन।

"चक्रं कामकलारूपं प्रसारपरमार्थतः।"

इति। एतत् कामकलारूपं प्रसारविलासेपि अस्मद्गुरुभिः प्रपञ्चितम्

"स्फुटशिवशक्तिसमागमबीजाङ्कुररूपिणी पराशक्तिः।
अणुतररूपानुत्तरविमर्शलिपिलक्ष्यविग्रहा भाति॥
परशिवरविकरनिकरे प्रतिफलति विमर्शदर्पणे विशदे।
प्रतिरुचिरुचिरे कुड्ये चित्तमये निविशते महाबिन्दुः॥
चित्तमयोऽहंकारः सुव्यक्त[2]हार्णसमरसाकारः।
शिवशक्तिमिथुनपिण्डः कवलीकृतभुवनमण्डलो जयति॥ तस्

१ क० पु० मातृ इत्यादि ~~चक्र~~ स्थान मित्यन्तं नास्ति। २ ख० पु० व्यक्ता इति पाठः।

३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सितशोणबिन्दुयुगलं विविक्तशिवशक्तिसंकुचत्स्मरम्।
वाग्अर्थसृष्टिहेतुः परस्परानुप्रविष्टविस्पष्टम् ॥
बिन्दुरहंकारात्मा रविरेतन्मिथुनसमरसाकारः।
कामः कमनीयतया कला च दहनेन्दुविग्रहौ विन्दू ॥
इति कामकलाविद्या देवी चक्रक्रमात्मिका सेयम्।
विदिता येन स मुक्तो भवति महात्रिपुरसुन्दरीरूपः॥

इत्यादि। एतस्य त्रिरूपत्वं पुनर्भवेत् इति एतस्य त्रिकोणात्मनः चक्रस्य पुनः त्रिरूपत्वं भवतु। पुनः-शब्देन पूर्वोक्तस्यैव गुणान्तरकथनं गम्यते। इदमेव त्रिकोणात्मकं भूयोपि शक्तित्वं सृष्ट्या बहित्वं च संहारात्मना प्रसाध्य तत् त्रिधा भूदित्यर्थः ॥ निधाय

एवं कृते सति सवासनं नवयोनिचक्रं निष्पाद्यते इत्याह

धर्माधर्मौ तथात्मानौ मातृमेयौ तथा प्रमा।
नवयोन्यात्मकमिदं चिदानन्दघनं महत् ॥

धर्माधर्मौ पुण्यपापे, आत्मानः आत्मा अन्तरात्मा परमात्मा ज्ञानात्मा चेति चत्वारः। मातृमेयौ माता जीवः मेयो ग्राह्यवर्गः, प्रमा वृत्तिः यथार्थज्ञानं प्रमा एवमेतत् नवमयं नवयोन्यात्मकं चक्रं चिदानन्दघनं चित् चैतन्यकला आनन्दो विश्वाहन्ताप-

१ क० पु० प्रसाध्येति पाठः। २ क० पु० निधाद्यते इति पाठः
३ क० पु० यथार्थज्ञानं प्रमेति नास्ति।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रिणामः ताभ्यां घनं बहिरन्तर्निबिडं यथा लवणघनं महत् देशकालाकारैरनाकलितं चिन्मयत्वात् ॥

प्रथम[1]त्रिकोणस्य पश्यन्त्यादित्रितयहेतुत्वात् तन्मयतां प्रतिपाद्य इदानीं बाह्यचक्रस्य वैखरीमयतां तदुत्थितां तत्त्वरूपतां च कथयति

चक्रं नवात्मकमिदं नवधा भिन्नमन्त्रकम् ।

इत्यादिना वाम[2]रूपभ्रमित्रयम् इत्यन्तेन इदं चक्रं त्रिकोणत्रयरूपेण नवात्मकं त्रैलोक्यमोहनादिनवचक्रात्मना मतं नवधा भिन्नमन्त्रकं वक्ष्यमाणकरशुद्ध्यादिनवचक्रेश्वरीमन्त्रनवकभेदवत् । बैन्दवा-

बैन्दवासनसंरूढसंवर्तानलचित्कलम् ।

बैन्दवा

सनं महाबिन्द्वात्मकसदाशिवासनम् अत्रैव वक्ष्यति

"सदाशिवासनं देवि महाबिन्दुमयं परम् ।"

इति शिवशक्त्योः सदाशिवतत्त्वोपरिस्थितत्वात् बैन्दवासनरूढत्वम् । संवर्तानलः यत्र[3] क्षित्यादिशिवपर्यन्तं लीयते तदनुत्तरं[4] परं रूपं सकलवर्णाद्यभूतम् अनुत्तरं प्रकाशात्मकं संवर्तानलः चिदेव कला चित्कला विमर्शात्मिका सर्ववर्णाभ्यन्तरहार्धकला । तदुक्तं संकेतपद्धत्याम्

"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥"

१ क० पु० प्रथममिति पाठः । २ क० पु० वामरूपत्वमिति पाठः ।
३ क० पु० अत्रेति पाठः । ४ तदनर्थकमिति पाठः ।
(४ क० पु०)

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति। वैन्दवासनसंहृष्टे संवर्तोन्नचित्कले यस्मिन् तत्।
तथैव त्रिकोणम्

त्रिकोणम्बिकारूपमहारस्थं स्वराहृतम्।

इदमेव शिवशक्तिसामरस्यरूपमहाबिन्दुमयमध्यचक्रोत्पन्नत्वात् अम्बिकारूपम् अष्टारस्थं त्रिकोणस्य स्पन्दत्रयमुत्पन्नत्वात् अष्टकोणस्य, ततः अष्टारस्थं स्वराहृतम्- अकारादिबिन्दुन्तपञ्चदशस्वरैः त्रिधा विभक्तैराकलितरेखात्रयम् अः स्वराक्रान्तमध्यम्

तदुक्तमभियुक्तैः

"विभाव्य च महाव्यश्रं समरेखं स्वरोदरम्।"

इति। अयमर्थः इदमेवत्रिकोणचक्रं नवचक्रात्मना परिणतं त्रिपुरादिनवचक्रेश्वरीकरशुद्ध्यादितत्तन्मन्त्रनवककलितम् अष्टकोणगतंघोडशस्वराहृतम्

अम्बिकापर्यन्तासामनसरूपमहाबिन्दुमयसदाशिवासनाहृष्टप्रकाशविमर्शात्मककामकामेश्वर्यधिष्ठितम्

इति।

उपरिचक्रं सनासनमुत्पादयति

नवत्रिकोणस्फुरितप्रभारूपदशारकम्।
पूर्त्यादिनवपर्यन्तदशारस्फूर्तिकारणम्॥
मूलतन्मात्रदशकप्रकाशनस्वनात्मतः।

---

१ क० पु० त्रिकोणस्फुरेति पाठः। २ क० पु० अर्धमिति पदं नास्ति।
३ क० पु० वाञ्छितामिति नास्ति।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नव च कोणं च नवत्रिकोणानि त्रिकोणशब्देन त्रिकोणमध्यबैन्दवो लक्ष्यते नवकोणानां बैन्दवस्य च स्फुरिताः प्रतीयमानाः प्रभा दश तद्रूपं दशारं यत्र यद्यथा परिणमते तत् तथाविधं शक्तिः रेफः। तदुक्तं मध्यारोद्रातन्त्रे[1] रमाशक्तिबीजोद्धारे

"चन्द्रः शक्तिर्महाशक्तिर्ब्रह्माणी कालिकादिकम्।"

मिति। शक्तेः रेफस्य आदिर्यकारः शक्त्यादियकारमारभ्य नवानां पर्यन्तगः क्षकारः तेषां दशानां स्फूर्तिकारकम् स्फूर्तिर्विमर्शः यकारादिक्षकारान्तदशवर्णविमर्शकम् इत्यर्थः। भूततन्मात्रमिति भूतानि पृथिव्यप्तेजोवाय्वाकाशतन्मात्राः पञ्च गन्धरसरूपस्पर्शशब्दाः तेषां दशानां प्रकाशा दश तेषामालम्बकत्वात् शिवात्मकत्वात् पृथिव्याद्यर्थानां शब्दात्मकत्वात्[2] यकारादिवर्णानां तदुभयप्रकाशविमर्शमय दशकोणवृत्तमिदं[3] चक्रमित्यर्थः। पृथिव्यादिक्षकारान्तवर्णदशकमयता कथनेन प्रथमदशारादिचक्रत्रयस्य स्थितिरूपता द्योत्यते॥

द्वितीयदशारमाह

द्विदशारस्फुरद्रूपं क्रोधेशादिदशार्णकम्।

द्वितीयदशारं द्विदशारं द्वितीयदशारतया स्फुरन्तः

---

१ ख० पु० रोद्धातन्त्रे इति पाठः। २ क० पु० शब्देति पाठः।

३ ख० पु० दशकेन इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रूप्यन्त इति रूपा इन्द्रियार्था दश शब्दादयो वचनाद-
यश्च द्वितीयदशारतया स्फुरन्तो रूपा यस्य तत् तथा-
विधम् । क्रधेशः ककारः ककारादिदशवर्णवत् ।
कोऽर्थः — बैन्दवत्रिकोणाष्टकोणचक्रेषु मध्यस्थि-
तप्रकाशविमर्शमयदीपद्वयदीपिते । तद्दशकप्रभा-
च्छायादशकद्वयमय-यकारादिपृथ्व्यादिककारादि-
दशकद्वयात्मकं दशारचक्रद्वयात्मना दृष्टमिति ॥
ननु 'भूततन्मात्रदशकप्रकाशालम्बनत्वत' इत्यत्रैव
शब्दादीनामुक्तत्वात् पुनर्द्विदशारस्फुरद्रूपमित्यत्रापि
रूपशब्देनापि कथं गृह्यते मैवं तन्मात्रपदेन भूत-
सूक्ष्माणामनिन्द्रियगोचराणां ग्रहणम् । रूपशब्देन भू-
तगणाः शब्दादयः श्रोत्रादिग्राह्या गृह्यन्ते अतो न
विचारः[1] ॥

चतुर्दशारमाह

चतुश्चक्रप्रभारूपसंयुक्तपरिणामतः ।
चतुर्दशाररूपेण संवित्तिकरणात्मना ॥
खेचर्यादिजयान्तार्णपरमार्थप्रथामयम् ।

चत्वारि चक्राणि बैन्दवत्रिकोणाष्टकोणप्रथमदशा-
ररूपाणि तेषां प्रभाः चतस्रो विकृष्टत्वात्[2] प्रभामात्र-
मेव गम्यते । यथा बहवो वृक्षा वनमिति नावयवभेदात्तः

१ क० पु० विचार इति पाठः । २ क० पु० विकृष्टेति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चक्रभेदः तथा तच्चक्रचतुष्टयसंयुक्तस्य द्वितीयदशारस्य संनिकृष्टत्वात् त्रयत्रयप्रतीतिः। तत्प्रभाचतुष्टयमेतद्वितीयदशारावयवश्चतुर्दशारहृपेण संविन्निकरणात्मना संविन्तिः ज्ञानं संविन्निशब्देन क्रियापि लक्ष्यते, करणानि इन्द्रियदशकं श्रोत्रादिकं वागादिकं च मनोबुद्ध्यहंकारचित्तानि चतुर्दश तदात्मना, विचरी टकारः जघा डैकारः टकारादिमकारान्ताः चतुर्दशवर्णाः तेषां परमार्थप्रथाकारणभूता प्रथा विमर्शः तन्मयम्। कोऽर्थः मध्यचक्रमेव त्रिकोणषट्कोण द्विदशकोण क्रमेण श्रोत्रादिज्ञानेन्द्रिय वागादिकर्मेन्द्रिय मनोबुद्ध्यहंकारचित्तात्मक करणचतुर्दशक-टकारादिमकारान्तवर्णचतुर्दशकं प्रकाशविमर्शमयचतुर्दशारहृपेण परिणतमित्यर्थः। त्रिकोणचक्रस्य ~~अस्मिन~~

"अम्बिकाहृपमेवेदमष्टारस्थं स्वराहृतम्।"

इत्यत्र अम्बिकाहृपतामुक्त्वा इदानीमष्टारादिचतुर्दशारपर्यन्तस्य श्रीचक्रस्य रौद्रीहृपतामाह

एवं शक्त्यनलाकारस्फुरद्रौद्रीप्रथामयम्।

एवमुक्तप्रकारेण शक्त्यनलाकारेण पञ्चशक्तिचतुर्वह्निहृपेण स्फुरत् चक्रं द्विचत्वारिंशद्योन्यात्मकं

---

१ क० पु० त्मना इति पाठः। २ क० पु० हृपेति पदं नास्ति।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रौद्रीशक्त्यात्मकं रौद्रीशक्तिविस्फारविजृम्भितमित्यर्थः ॥

पिण्डं चक्रमाह

ज्येष्ठारूपचतुष्कोणं वामरूपत्रिकम् ।

ज्येष्ठाशक्तिरूपाणि चतुष्कोणानि चत्वारस्राणि यस्य तत् ज्येष्ठारूपचतुष्कोणं वामाशक्तिरूपं त्रिकं शक्तित्रयं यस्य त्रिकशब्देन तदन्तरालस्थितं षड्द्वयमपि लक्ष्यते । अत्रैव वक्ष्यते च षड्द्वयेनेति । अत्र "वामारूपत्रिकं ज्येष्ठारूपचतुष्कोणमिति" पाठे युक्तेऽपि अम्बिकादिशक्तिपाठक्रमायातत्वात् "ज्येष्ठारूपचतुष्कोणं वामारूपत्रिकमि"त्युक्तं देवेन ॥

पुनरप्येव चक्रस्य वासनान्तरमाह

चिदंशान्तस्त्रिकोणं च शान्त्यतीताष्टकोणकम् ।
शान्त्यंशद्विदशांशं च तथैव भुवनारकम् ॥
विद्याकलात्रयारूपदलाष्टकसमावृतम् ।
प्रतिष्ठावपुषा स्पष्टसुरद्वयदलाम्बुजम् ॥
निवृत्त्याकारविलसच्चतुष्कोणविराजितम् ॥

चिदंशाः चित्कला तन्मयमन्तस्त्रिकोणं शान्त्यतीतशान्तिविद्याप्रतिष्ठानिवृत्तयः गगनादिपञ्चभूतकलाः तन्मयमेतच्चक्रमित्यर्थः । अवयवार्थस्तु स्पष्ट एव ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अस्यैव चक्रस्य संहारक्रमेण वासनान्तरमाह त्रैलोक्य-मोहनाद्य इत्यादि क्रियाशेषमित्यन्तेन

त्रैलोक्यमोहनाद्ये तु नवचक्रे सुरेश्वरि ।

अत्र तुशब्दः पूर्वोक्तकामकलारूपत्वप्रतिपादनप्रसङ्गपरिसमाप्तौ । त्रैलोक्यमोहनाद्ये नवचक्रे जातावेकवचनम् त्रैलोक्यमोहनाद्ये तु इत्यत्र आद्यशब्दात् सर्वाशापरिपूरकादिचक्राणि उच्यन्ते तेषां नामानि उत्तरत्र वक्ष्यति त्रैलोक्यमोहनाद्येष्वित्यर्थः ॥

नादो बिन्दुः कला ज्येष्ठा रौद्री वामा तथा पुनः ।
विषघ्नी दूतरी[1] चैव सर्वानन्दः क्रमात्स्थिताः ॥

नादादिसर्वानन्दान्ता नवशक्तयः त्रैलोक्यमोहनादिबैन्दवान्तनवचक्रेषु क्रमेणाधिवसन्तीत्यर्थः । पदार्थः स्पष्ट एव ॥

पूर्वम् "अम्बिकारूपमेवेदम्" इत्यादिना प्रकाशांशानामम्बिकादीनां चतुर्णां त्रिकोणादिचतुरस्रादिमयता[2] वासनामुक्त्वा इदानीं विमर्शांशानां शान्तादीनां चतुर्णां चतुरश्रादिबैन्दवान्तचक्रमयतावासनामाह

निरंशो नादबिन्दू च कला चेच्छास्वरूपकम् ।
ज्येष्ठा ज्ञानं क्रियाशेषम् ... ॥

निरंशः शान्ताशक्तिः शान्ताया निरंशत्वं चिद्रू-

१ ख० पु० लहरीति पाठः । २ क० पु० श्रादिमयेति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पत्वात्। तेन निरंशौ नादबिन्दू द्वावपि शून्याशक्तिमयौ, नादबिन्दुरूपं च चतुरस्रषोडशदलात्मकं चक्रद्वयं शून्याशक्तिमयमित्यर्थः। कला चेच्छास्वरूपकम् इच्छाधाः स्वरूपं कलारूपेषु अष्टदलपद्मेषु इच्छाशक्तिमयमित्यर्थः। ज्येष्ठा ज्ञानं ज्ञानशक्तिरेव ज्येष्ठारूपं चतुर्दशारं ज्ञानशक्तिमयमित्यर्थः। क्रिया शेषं रौद्रीवामादि विधध्नीदूतरीसर्वानन्देति शक्तिपञ्चकरूपं त्रिदशारत्रिकोण त्रिकोण बैन्दवाख्यचक्रपञ्चकं क्रियाशक्तिमयमित्यर्थः॥

पूर्वं चक्रस्य "शून्याकारात्" इत्यारभ्य कामकलारूपतां प्रतिपाद्य इदानीमुपसंहरति

- - - - - - इत्येवं त्रितयात्मकम्।
चक्रं कामकलारूपं प्रसारः परमार्थतः॥

यत् यस्मात् प्रहृतं तत् तस्य परमार्थतः तद्रूपं च तत् यथा मृत् घटस्य स्वरूपश्च घटः तन्तवः पटस्य तन्तुरूपः पटः एवं कामकलाकारात् प्रहृतस्य चक्रस्य कामकलाकारं परमार्थतः तद्रूपं चेदं चक्रमित्यर्थः॥

पुनरप्येव चक्रस्य प्रकारान्तरेण वासनान्तरमाह "अकुले विसृमंत्ते चेत्यादिना "परमानन्दघूर्णितमित्यन्तेन

अकुले विसृमंत्ते च शून्ते वह्नौ तथा पुनः।

१ ख० पु० लहरीति पाठः। २ क० पु० परमार्थतः इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नाभावनाहते शुद्धे लम्पिकाग्रे भ्रुवोन्तरे ॥
बिन्दौ तदर्धरोधिन्यां नादे नादान्त एव च ।
शक्तौ पुनर्व्यापिकायां समनोन्मनिगोचरे ॥

महाबिन्दौ विति ।

कुलादन्यत् अकुलं सुषुम्नामूलं सहस्रदलकमलं नाम तदुपरि अष्टदलोर्ध्वस्थितषड्दलं कुलपद्मम् । तदुक्तं स्वच्छन्दसंग्रहे

"अधश्चोर्ध्वं सुषुम्नायाः सहस्रदलसंयुतम् ।
रक्तं श्वेतं च साहस्रदलस्थं शक्तिभिर्युतम् ॥
ऊर्ध्वाधोमुखमीशानि कर्णिकाकेसरान्वितम् ।
शक्तिरूपं महादेवि कुलाकुलमयं शुभम् ॥
पङ्कजद्वयमीशानि स्थितं शाश्वतमव्ययम् ।
तयोर्मध्ये सुषुम्नान्तस्त्रिदशाधारपङ्कजम् ॥
शक्तिरूपं शिवाकारं सर्वाभ्यासनिजालयम् ।
तेषां रूपं क्रमं चैव क्रमाद्वक्ष्येऽधुना शृणु ॥
इदं मेढ्रान्तरं देवि पञ्चाङ्गुलसमुच्छ्रितम् ।
इदमेकाङ्गुलं मध्ये द्व्याङ्गुलविसारणम् ॥
तस्य मूले महायोनिस्त्रिकोणाकाररूपिणी ।
सुषुम्ना योनिमध्यस्था तस्या मूले महेश्वरि ॥
अधःपद्मं सहस्राक्षं कर्णिकाकेसरान्वितम् ।

१ क०पु० बिन्दाविति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेजसं रक्तवर्णं तद्दलस्थितशक्तिभिः ।
प्रतिकिञ्जल्कसंस्थाभिः शक्तिभिः संवृतं प्रिये ॥
कर्णिकामध्यतो देवि कुलदेवी च संस्थिता ।
तत्पद्मोर्ध्वं सुषुम्नाया मध्ये त्वेकाङ्गुलोपरि ॥
षड्भमष्टदलेर्युक्तं महद्ग्रन्थिसमन्वितम् ।
रक्तं सुकर्णिकोपेतं रक्तकिञ्जल्कशोभितम् ॥
ग्रन्थ्यग्रस्थ त्रिशूलं च ब्रह्मण्याद्यष्टभैरवैः ।
अष्टपत्रस्थितग्रन्थिस्थितवर्णादिशक्तिभिः ॥
तदन्यशक्तिभिश्चैव शूलाग्र्याभिः समावृतम् ।
तन्मध्ये कौलशक्त्या तु सेवितं च सुरोत्तमैः ॥
एकाङ्गुलप्रमाणोर्ध्वं षडदलं कुलपङ्कजम् ॥"

इति ॥

ननु कुलादन्यत् अकुलमिति चेदर्थः तर्हि तदन्तर्गतस्थिताष्टदलपद्मस्यापि अकुलत्वं किं न स्यादित्यत आह विसुसंज्ञे चेति विसृ व्याप्तौ यत् सुषुम्नातदन्तर्गतत्रिशूलत्यङ्कजानि च व्याप्नुवन्ति तत् सहस्रदलकमलं विद्यत् सर्वाधारत्वात् ततो नाष्टदलकमलमकुलमित्यर्थः । शूलाग्रे वह्नौ वह्नौ शूलाग्रे इति व्यत्ययेन पठितव्यम् । वह्निर्मूलाधारः वह्निबिम्बाधारत्वात् । तदुक्तं स्वच्छन्दसंग्रहे

"आधारपङ्कजं पीतं चतुष्पत्रं सुकेसरम् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अधोमुखं च तन्मध्ये कुण्डली परमेश्वरि ॥
स्वयंभूमध्यगा चिन्त्या वरदादिभिरावृता ॥
पार्थिवं पङ्कजं ह्येतत्तस्याधः पङ्कजं परम् ॥
तैजसं परमेशानि तन्मध्येऽमितप्रभाक्षयः ।
निष्कलाः परमेशानि विद्युत्पुञ्जनिभाः स्मरेत् ॥
तदूर्ध्वे कर्णिकामध्ये वह्निबिम्बं तदूर्ध्वकम् ।
पूर्णपीठं च तस्योर्ध्वे डाकिनी संस्थिता शिवे ॥"

इति । डाकं डाकिनीः हृल्लेखा तदूर्ध्वस्थितत्वात् डाकं स्वाधिष्ठानं । तदुक्तं स्वच्छन्दसंग्रहे

"आधारपङ्कजस्योर्ध्वे सार्धद्व्यङ्गुलकोपरि ।
तैजसं साष्टपत्रं च पीतकर्णिकया युतम् ॥
हृल्लेखा कर्णिकामध्ये स्थिता नक्षादिसेविता ।
एतस्माद्द्व्यङ्गुलादूर्ध्वे स्वाधिष्ठानं षडब्जकम् ॥
आप्यं च रन्ध्रनीडाक्षिपूर्वाभिः डाकिभिर्वृतम् ।
काकिनीमभिसंचिन्त्य . . . . . ॥"

इति । नाभौ दशदलकमले मणिपूरके तदुक्तं तत्रैव

. . . . . नाभिरष्टाङ्गुलोपरि ।
तत्पद्मं मणिपूरं च दशपत्रं सुशोभितम् ॥
लाकिनीमध्गं तत्र डामर्यादिभिरावृतम् ।"

इति । अनाहते हृदयस्थाने द्वादशदलकमले तदुक्तं तत्रैव

"चतुर्दशाङ्गुलादूर्ध्वे मणिपूराख्यपङ्कजात् ।

---

२ ख० पु० अधोमुखीति पाठः । ३ क० पु० दक्षलादिति पाठः ।
३ ख० पु० बन्धनीति पाठः । ४ क० पु० नाभिरिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षड्दलं हाकिनीमध्यं द्वादशारमनाहतम् ॥
तत्रस्थकालराज्यादिशक्तिभिश्च समावृतम् ॥
तत्रस्थसूर्यबिम्बे तु नादोड्डीनाख्यपीठकम् ॥"

इति। भ्रुवौ कण्ठस्थितघोडशदलकमले। तदुक्तमत्रैव

"तस्मादेकाङ्गुलादूर्ध्वे विशुद्धिघोडशारकम्।
मध्यगा डाकिनी बाह्यपत्रेषु परमेश्वरि ॥
अमृताद्यक्षरान्तःस्था चन्द्रबिम्बं तदूर्ध्वतः।"

इति। लम्बिकाग्रे आज्ञादलकमले। तदुक्तमत्रैव

"कण्ठोर्ध्वे परमेशानि लम्बिका चतुरङ्गुले।
तस्यामाज्ञादलं पद्मं वशिन्यादिभिरावृतम् ॥"

इति। भ्रुवोऽन्तरे आज्ञाख्यं द्विदलकमले। तदुक्तं तत्रैव

"आज्ञाधारं द्विपत्राब्जं हक्षद्विदलसंयुतम्।
हंसवतीक्षमाख्यार्धद्वये मध्ये तु हाकिनी ॥"

इति। भ्रुव इत्येकवचनं भ्रूद्वयोपलक्षणं भ्रुवोरन्तरे इत्यर्थः। इन्दौ बिन्दौ बिन्दुतदर्धरोधिनीनादनादान्तशक्ति-व्यापिकासमनोन्मनीनाम् उपर्युपरि हृत्पाणि उच्चारण-कालं च वक्ष्यति। बिन्दाद्युन्मन्यन्ता भागाः सूक्ष्माः सूक्ष्मतरा देहचक्रविद्यानां साधारणाः। अत्र त्रैलोक्य-मोहनाद्युन्मन्यन्तान् स्थूलसूक्ष्मसूक्ष्मतरांश्चक्रभागान् चक्रलाद्युन्मन्यन्तेषु स्थूलसूक्ष्मसूक्ष्मतरेषु भागेषु महाबिन्दौ च तान् विभावयेदित्यर्थः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पुनरपि त्रैविध्यमाह

पुनश्चैवं विधा चक्रं तु भावयेत् ।

एवमुक्तप्रकारेण विभावितं चक्रं पुनः त्रिधा विभावयेत् ।

त्रैविध्यमाह

आज्ञान्तं सकलं प्रोक्तं ततः सकलनिष्कलम् ।
उन्मन्यन्तं परेस्थाने निष्कलं च त्रिधा स्थितम् ॥

आज्ञान्तमकुलाद्याज्ञापर्यन्तं चतुरस्रादित्रिकोणान्तं चक्राष्टकं स्थूलं भावयेत् तद्भावनं सकलं। ततो बिन्दुमारभ्य उन्मन्यन्तं चक्रं सूक्ष्मसूक्ष्मतरभागान् भावयेत् तद्भावनं सकलनिष्कलं। तत्रानुत्पन्ननिःस्पन्दा वाक् शून्यसंवित् उत्पित्सुः संवित् उत्पत्त्यवस्था हृक्मा "मूलाधारात् प्रथममुदिता" इति परापरे स्थाने महाबिन्दौ शुद्धशून्यसंविदं भावयेत् तद्भावनं निष्कलं त्रिधा स्थितम्। अकुलाद्याज्ञान्ताः तन्त्रान्तरेषु विस्तरेणोक्ताः अतो नात्रोक्ताः ॥

बैन्दवाद्युन्मन्यन्तानां ह्रस्वमुच्चारणकालं चाह दीपकोरित्यादिना मनोन्मन्यन्तेन

दीपाकारोऽर्धमात्रश्च ललाटे वृत्त इष्यते ।

दीपाकारो दीपस्य यादृशं भासनं तादृशमस्येत्यर्थः। अर्धमात्रश्च ह्रस्वस्योच्चारणकालो मात्रोच्यते मात्राया

१ क० पु० परस्थाने इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अर्धमात्र उच्चारणकालो यस्य सोऽर्धमात्रः ललाटे वृत्त इ-
ष्यते वर्तुलसंनिवेशो ललाटे भ्रुवोरुपरिभागे दीर्घा-
कारोऽर्धमात्रोच्चारणकालो वृत्तविस्तरः स्वच्छन्द-
संग्रहे प्रपञ्चितः

"तत्र बिन्दोर्यथा विन्द्वाचरणेन तदूर्ध्वतः ।
सूर्यकोटिप्रतीकाशामतिदीप्तं महद्गुणम् ॥
तन्मध्ये दशकोटीनां संख्यायोजनपङ्कजम् ।
तत्कर्णिकायामासीनः शान्त्यतीतेश्वरः प्रभुः ॥
पञ्चवक्त्रो दशभुजो विद्युत्पुञ्जनिभाकृतिः ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिरनुक्रमात् ॥
परिवार्य स्थिताश्चैताः शान्त्यतीतस्य सुन्दरि ।
वामभागे समासीना शान्त्यतीता मनोन्मनी ॥
पञ्चचक्रधराः सर्वा दशबाह्विन्दुभूषणा ।
बिन्दुरूपं समाख्यातं कोट्यर्बुधगुणैर्वृतम् ॥"

इति ॥

अर्धचन्द्रस्तथाकारः पादमात्रस्तदूर्ध्वतः ।

अर्धचन्द्रो बिन्दोरर्धभागः तथाकारो दीर्घाकारः
एव पादमात्रः मात्राकालोऽस्य चतुर्थभागोच्चारण-
काल इत्यर्थः । तदूर्ध्वतो बिन्दोरूर्ध्वभागे बिन्दूपरि-
देशे पादमात्रोच्चारणकाले दीर्घाकारोऽर्धचन्द्र इ-
त्यर्थः ॥

---

१ क० पु० संनिवेशो इत्यारभ्य तु इत्यन्तं नास्ति ।
२ क० पु० बिन्दुरूपमिति पाठः । ३ ख० पु० तदूर्ध्वके इति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ज्योत्स्नाकारा तथार्द्धांशा रोधिनी त्र्यश्रविग्रहा।

ज्योत्स्नाकारा चन्द्रिकासमकान्तिः षष्ठांशमात्रार्द्धांशोच्चारणकाला त्र्यश्रविग्रहा त्रिकोणाकारा रोधिनी द्वयोरपि स्वच्छन्दसंग्रहे यथा प्रपञ्चः

"अर्धचन्द्रस्तदूर्ध्वे तु रोधिनी तस्य चोपरि।
ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमलापि च॥
अर्धचन्द्रोत्थिता ह्येताः कलाः पञ्च प्रकीर्तिताः।
हृन्मनी रोधिनी रोधा ज्ञानबोधा तमोपहा।
निरोधिकाकलाः पञ्च कथितास्तव सुन्दरि॥
ब्रह्मादिपरमेशानां परप्राप्तिनिरोधनात्।
निरोधिकेति सा प्रोक्ता तस्या भेदाद्वरानने।
परपदाव्यसंप्राप्तिः - - - ॥"

इति॥

बिन्दुद्वयान्तरे दण्डः प्रोपहूपो मणिप्रभः।
॥

कलांशाः

बिन्दुद्वयमध्यगतऋजुरेखाकारः प्रोपहूपः मुक्तद्वयमध्यगतसिरा प्रोप इत्युच्यते तत्तुल्यहूपो मणिप्रभः पद्मरागसवर्णवर्णः कलांशाः कलाः षोडशमात्राः षोडशांशोच्चारणकाल इत्यर्थः। स पुनः कलांशो नादः तत्रेणोच्यते कलो नादः

१ कलक० पु० ज्ञानबोधेति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ध्वनौ तु मधुरस्फुटे कल इत्यमरः। मधुरस्फुटो ध्वनिः
नादः। नादप्रपञ्चो यथा स्वच्छन्दसंग्रहे

"रोधिन्याख्यं यदुक्तं ते नादस्तस्योर्ध्वसंस्थितः।
पद्मकिञ्जल्कसंकाशः सूर्यकोटिसमप्रभः॥
पुरैः परिवृतोऽसंख्यैर्मध्ये पञ्चकलावृतः।
इन्धिका दीपिका चैव रोचिका मोचिका तथा।
ऊर्ध्वगा मध्यगा तासां पञ्चमी परमा कला।
चन्द्रकोटिसमप्रख्यं तन्मध्येर्बुधयोजनम्॥
पद्ममध्ये समासीनमीश्वरं चोर्ध्वगामिनम्।
चन्द्रायुतप्रतीकाशं पञ्चवक्त्रं त्रिलोचनम्॥
इन्दिराद्यैर्वृतं देवं शूलपाणिं जटाधरम्।
तस्योत्सङ्गगतामूर्ध्वगामिनीं परमां शिवाम्॥
ध्यायेत . . . . . . ॥"

इति॥०

- - - - द्विगुणांशश्च नादान्तो विद्युदुज्ज्वलः।
हलाकारस्तु सव्यस्थबिन्दुयुक्तो विराजितः॥

हलाकारो लाङ्गलसदृशाकारः सव्यस्थबिन्दुयुक्तो बिन्दुद्वयमध्ये दक्षिणभागस्थिते[1] बिन्दुयुक्तः विद्युदुज्ज्वलः तडित्सदृशकान्तिः द्विगुणांशश्च पूर्वोक्तषोडशानां द्विगुणांशो द्वात्रिंशत्तमो भागः। कोऽर्थः— मात्राद्वात्रिंशत्तमांशोच्चारणकालो हलाकारादिविशेषण विशेषितो नादान्त इत्यर्थः। नादस्यान्तो लयो

१ क० पु० स्थिते इति पाठः॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लक्ष्यो भवति यत्र ब्रह्मरन्ध्रे तत्प्रपञ्चः स्वच्छन्दसंग्रहे यथा

"हलाकारस्तु नादान्तो भित्त्वा सर्वमिदं जगत् ।
अधः शक्त्या विनिर्भिद्य ऊर्ध्वं शक्त्यवसानकैः ॥
नाड्या ब्रह्मबिले लीनस्त्वव्यक्तध्वनिलक्षणः ॥
अतो ब्रह्मबिलं ज्ञेयं रुद्रकोट्यर्बुधैर्युतम् ॥
तत्र ब्रह्मा शिवो ज्ञेयः शशाङ्कशतसंनिभः ।
दशबाहुस्त्रिनेत्रश्च पञ्चवक्त्रेन्दुशेखरः ॥
ब्रह्माणी त्वपरा शक्तिर्ब्रह्मणोत्सङ्गगामिनी ।
द्वारं सा मोक्षमार्गस्य रोधयित्वा व्यवस्थिता ॥"

इति ॥

शक्तिर्वामस्थबिन्दूद्यत्सिराकारा तथा पुनः ।

पुनःशब्देन पूर्वेभ्यो विशेषो द्योतते । पूर्वेषां बिन्द्वाद्यंशानां स्वरूपवर्णमात्राकलांशाः कल्पिताः शक्तिमारभ्य समनान्तानामंशानां स्वरूपवर्णमात्राकलाः पश्चात् वक्ष्यन्त इत्यर्थः । शक्तिर्बिन्दुद्वयमध्ये वामभागस्थबिन्दूद्यत्सिरारूपा । शक्तिप्रपञ्चः स्वच्छन्दसंग्रहोक्तो यथा

"शक्तितत्त्वं समाख्यातं भुवनैराश्रितं महत् ।
आधारं भुवनानां च प्रवक्ष्यामि समासतः ॥

---

१ क० पु० ऊर्ध्वमिति पाठः । २ क० पु० द्योतते इति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृता मिता ।
चतुर्दिक्षु स्थिता स्तासां मध्यस्था व्यापिनी स्मृता ॥
पञ्चवक्त्रा त्रिनेत्रा च सुतेजस्का च पञ्चमी ।
शाक्तितत्त्वं समाख्यातं ध्यानान्मुक्तिफलप्रदम् ॥"

इति ॥

व्यापिका बिन्दुविलसत्त्रिकोणाकारतां गता ।

व्यापिका बिन्दोर्विलसद्वामादित्रिशक्तिमयत्रिकोणरूपतां गतेत्यर्थः । इयं तु शाक्तितत्त्वकथनेनैव कथिता स्वच्छन्दसंग्रहे यथा "सूक्ष्मा चैव सुसूक्ष्मा च" इत्यव्यवहितमुक्तम् ॥

बिन्दुद्वयान्तरालस्थ ऋजुरेखामयी पुनः ।
समना ॥

स्मृतम् । समनायाः शम्भोः स्वच्छन्दसंग्रहे यथा

"चिदानन्दस्वरूपा तु परा शाक्तिस्तदूर्ध्वतः ।
समना नाम सा शाक्तिः सर्वकारणकारणम् ॥
सर्वाण्डानि बिभर्तीयं शिवेन समधिष्ठिता ।
अत्रोहः[1] स भगवान् शिवः परमकारणम् ॥
शिवः सर्वस्य कर्तेयं शाक्तिः कारणमिष्यते ।"

इति ॥

- - बिन्दुविलसदृजुरेखा तथोन्मना ।
एकस्मादेव बिन्दोर्विलसदृजुरेखारूपा उन्मना ।

---

१ क० पु० ख० सर्वोनानीति पाठः ।
२ ख० पु० अत्रहः इति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

उन्मनाद्याः षडपञ्चः स्वच्छन्दसंग्रहे यथा

"द्या पूर्णिः कारणत्वेन तदूर्ध्वे उन्मनी स्मृता ।
नात्र कालकलाभानं न तत्त्वं नच देवता ॥
स्वनिर्वाणं परं शुद्धं गुह्यवक्त्रं तदुच्यते ।
पूर्णिवपूर्णिरिति ख्याता निर्विकल्पा निरञ्जना ॥"

इति ॥

पूर्णयादीनां समनान्तानां वर्णमात्रांशकालं चाह

पूर्णयादीनां वपुः[1] स्फूर्जद्द्वादशभानुनिभम् ।
चतुःषष्टिस्तदूर्ध्वं तु द्विगुणं द्विगुणं ततः ॥
पूर्णयादीनां तु मात्रांशो मनोन्मन्या तथोन्मनी ॥

मनोन्मन्या इति मनोन्मनीपर्यन्तं मनोन्मनी नाम समना मनःसहितत्वात् तद्रहितत्वादुन्मनीत्युच्यते । पूर्णयादीनामुन्मनीपर्यन्तानाम् अंशानां वपुः स्वरूपं स्फूर्जद्द्वादशभानुनिभम् एकत्र हेलयोदितद्वादशभानुसदृशवर्णवर्णम् । मात्रांशाः चतुःषष्टिमात्रांशकालाः चतुःषष्टितमोंऽशा इत्यर्थः । तदूर्ध्वं तु व्यापिकाया मात्रांशोच्चारणं द्विगुणं व्यापिकोच्चारणमात्रावयवकालः अष्टाविंशात्युत्तरशततमो भाग इत्यर्थः । समनोच्चारणमात्रावयवकालः षडधिकपञ्चाशदुत्तरद्विशततमो भाग इत्यर्थः । तथोन्मनीति उन्म-

१ ख० क० पु० हृद्यवक्त्रमिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नी यथेदानीम् अकथितविशेषणा तथा निराकारा निरुच्चारा "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्युपनिषदुक्तरीत्या मनोतीतगोचरत्वात् उन्मनीत्युच्यते । महाबिन्दौ च अकाररूपवर्णोच्चारकला न विद्यन्ते अतो नात्रोच्यन्ते तस्य विश्वोत्तीर्णत्वात् । तदुक्तं स्वच्छन्दसंग्रहे ~~यथा~~

"तत्त्वातीतं वरारोहे वाङ्मनोतीतगोचरम् ।
निष्कलं चापि सकलं नीरूपं निर्विकल्पकम् ॥
निर्द्वन्द्वं परमं ~~सूक्ष्म~~ तत्त्वं शिवाख्यं परमं पदम् ।"

इति । अकारादिबिन्द्वन्तानां स्थूलवर्णानामुच्चारणकालो मात्रा बिन्द्वादिसमनान्तानामर्धमात्रा तदर्धादिक्रमेण लवपर्यन्तमुच्चारणकालो लवः ।

"नलिनीपत्रसंहत्यां सूक्ष्मसूच्यभिवेधने ।
दले दले तु यः कालः स कालो लववाचकः ॥"

इति वचनात् तदूर्ध्वं शून्य एव तदधिकसूक्ष्मतरकालाभावात् । एवंविधविश्वभावनया शिव एव भूयादित्यर्थः । तदुक्तं विज्ञानभैरवभट्टारके

"पिण्डरूपस्य मन्त्रस्य स्थूलवर्णक्रमेण तु ।
अर्धेन्दुबिन्दुनादान्तशून्योच्चाराद्भवेच्छिवः ॥"

इति । अत्र बिन्द्वर्धेन्दु-इति वक्तव्ये वृत्तानुरोधेन व्यत्यासः । बिन्द्वर्धेन्दुनादान्तशून्योच्चाराद्भवेच्छिव इति प्र-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्याहाररीत्या ग्रहणम् अर्धेन्दोरुपरि रोधिनीनादयोः नादान्तस्य चोपरि शक्तिव्यापिकासमनानां च विद्यमानत्वात् शून्यशब्देन उन्मनोच्यते। अतोऽर्धेन्दुबिन्दुनादान्तशून्योच्चाराद्भवेत् इति पिण्डरूपस्य मन्त्रस्य संग्रहोक्तिः॥

देशकालानवच्छिन्नं तदूर्ध्वे परमं महत्।
निसर्गसुन्दरं तत्तु परमानन्दघूर्णितम्॥

तदूर्ध्वे हकारादिबिन्द्वन्तानां सकलनिष्कलकेवलनिष्कलानां त्रयाणामपि ऊर्ध्वे परमं महत्। महत्त्वं घटादीनामप्यस्ति न्यूनपरिमाणापेक्षया अत उक्तं परममिति। यतः परं महत्त्वं नास्ति तत् परमं पदम्। अत एव देशकालानवच्छिन्नं देशकालाकारैरनवच्छिन्नमेव परमं महदिति, तेन निसर्गसुन्दरं लोकेऽसुन्दरमपि वस्त्राद्यलंकारैः आरोपितैः सुन्दरमिव प्रतीयते, इदं तु स्वभावसुन्दरं सर्वैः स्वात्मतया स्पृहणीयत्वात्; परमानन्दघूर्णितम् आनन्दः शब्दादिविषयानुभवेपि अस्ति क्षणिकः तदुच्यते परमानन्दघूर्णितमिति। कोऽर्थः—त्रित्रिरूपसमवस्थवस्तुभ्यः पुरातनी देशकालानवच्छिन्नपरममहद्रूपा स्वभावसुन्दरी परमप्रकाशात्मक परमशिवसामरस्यपरानन्दशालिनी विमर्शशक्तिर्महात्रिपुरसुन्दरीत्यर्थः॥

१ ख० पु० अत्रेति पाठः। २ ख० पु० संग्रहेणोक्तिः इति पाठः।
३ क० पु० कालानवेति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"प्रसृतं विश्वलहरीस्थानम्" इति पूर्वमत्र सूचितां मातृकामयवासनामिदानीं विवृणोति

आत्मनः स्फुरणं पश्येद्यदा सा परमा कला ।
अम्बिकारूपमापन्ना परा वाक् समुदीरिता ॥

सा परमा सर्ववर्णाद्यभूतविमर्शकला विमर्शशक्तिः आत्मनः परमशिवस्य स्फुरणं पश्यन्त्यादिक्रमेण वैखरीपर्यन्तं विमर्शनं पश्येत् द्रष्टुमिच्छेत् तदा परमा शान्तात्मिका भूत्वा अम्बिकारूपमापन्ना प्रकाशांशभूतायाः सामरस्यमापन्ना परा वाक् समुदीरिता परमातृकोच्यते । तदुक्तं संकेतपद्धत्याम्

"अनयोः सामरस्यं यत्परस्मिन् महसि स्फुटम् ॥"

इति ॥

बीजभावस्थितं विश्वं स्फुटीकर्तुं यदोन्मुखी ।
वामा विश्वस्य वमनादङ्कुशाकारतां गता ॥
इच्छाशक्तिस्तु वामेयं पश्यन्तीवपुषा स्थिता ॥

बीजभावस्थितं विश्वं यथा बीजे वृक्षः तथा षट्त्रिंशत्तत्त्वात्मकं विश्वं परायां कारणतावन्मात्रतामास्थितं स्फुटीकर्तुं यदोन्मुखी स्फुटीकर्तुमुत्पादयितुमुन्मुखी अत्रोत्पादनं नाम स्फुटीकरणं अत एव कार्यस्य स्फुटीकरणात् वामा विश्वस्य वमनात् कारणे सतो विश्वस्य वमनात् वमनं नामोदरस्थस्याहारादेः बहिर्निर्यासनम्

१ क० पु० स्तु वामयमिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

उत्पादनमपि एवमेव। अत एव गर्भभावेन आत्मोदरगतस्य विश्वस्य बहिर्वमनात् वामा च अङ्कुशाकारतां गता वक्रत्वाच्च वामा प्रकटस्य वामरेखा सृष्टिरूपापि अभूदित्यर्थः। तथा चेच्छाशक्तिः इच्छाशक्तिसामरस्यमापन्ना पश्यन्तीरूपेण स्थितेत्यर्थः ॥

ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता।
ऋजुरेखामयी विश्वस्थितौ प्रथितविग्रहा ॥

तथा ज्येष्ठाशक्तिः ज्ञानशक्तिर्यथा वामाशक्तिः इच्छाशक्तिसामरस्यमापन्ना विश्वस्य स्थितौ प्रथितविग्रहा सृष्टेविश्वस्य स्थितौ हेतुत्वात् ऋजुरेखामयी। अत्र प्रकटाग्रेखाकारमध्यमा वागुदीरिता मध्यमा मातृकात्वमापन्ना ॥

तत्संहृतिदशायां तु बैन्दवं रूपमास्थिता।
पत्याकृतिक्रमेणैवं प्रकटवपुरुज्ज्वला ॥
क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहा।

सृष्टस्य स्थितस्य विश्वस्य संहारकाले बैन्दवं रूपमास्थिता अम्बिका प्रागन्तासामरस्यरूपमास्थिता मध्यबिन्दोराविर्भूय सृष्टिंस्थितिं च संपाद्य तत्संहारोन्मुखी पुनः बिन्दुमेव प्रविष्टेत्यर्थः। एवं पत्याकृतिक्रमेण दृश्यं क्रियाशक्तिसामरस्यात्मैवं प्रकटवपुः प्रकटस्य दक्षिणरेखा भूत्वा उज्ज्वला प्रकटस्य रूपेण भासमाना

१ ख० पु० सृष्टस्य विश्वस्येति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षट्कोणं नाम त्रिकोणं वैखरी विश्वविग्रहा वाग्रूपप्रपञ्चम-
यवैखरीरूपा जातेत्यर्थः ॥

प्रकाशविमर्शांशरूपाणामम्बिकादीनां शान्तादीनां
चतसृणां शक्तीनां षट्कोणरूपतामुक्त्वा पुनरिदानीं त्रि-
कोणान्तर्गतपीठाकारवर्णलिङ्गावस्थाचतुष्टयमयता-
वासनामाह भासनादित्यादिना तुर्यरूपाण्यमूनि च
इत्यन्तेन तत्र उत्तरार्धवक्ष्यमाणचतुष्टयत्वे हेतुमाह

भासनाद्विश्वरूपस्य स्वरूपे बाह्यतोऽपि च ।
एताश्चतस्रः शक्त्यस्तु कापूजाउ[1] इति क्रमात् ॥

विश्वं शिवादिभूम्यन्तं नामरूपात्मकं तद्रूपस्य स्वरू-
पे बीजभावेन बाह्यतः सृष्ट्यात्मना भासनात् एताः
चतस्रः शक्त्यस्तु शकी व्याप्तौ इत्यस्य धातोः शक्ति-
शब्दव्युत्पत्तिः चतस्रः क्रमेण परस्परसामरस्यमाप-
न्नाः कापूजाउ इति क्रमात् आसन् का कामरूपपीठं
पू पूर्णगिरिपीठं जा जालन्धरपीठं उ उड्डियानपीठं प्र-
काशविमर्शतया समरसीभूताः पूर्वोक्ताश्चतस्रः शक्त-
यः कामरूपपूर्णगिरिजालन्धरोड्डियानरूपेण परिणताः ॥

पीठचतुष्टयस्य पिण्डादिमयतावासनामाह
पीठाः कन्दे पदे रूपे रूपातीते क्रमात् स्थिते[2] ॥

१ ख० पु० ओ इति पाठः । २ क० ख० स्थिते इति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कन्द इति सुषुम्नामूलं कन्दशब्देन तत्रस्था पिण्डाख्या कुण्डली लक्ष्यते तदुक्तं स्वच्छन्दसंग्रहे

"लङ्घित्वालं सुषुम्नाधः कन्दस्थाने च साहतम्।
इच्छाज्ञानक्रियारूपां कुण्डलीं परमेश्वरीम्॥
सुषुम्नभुजगाकारां मातृकारूपिणीं शिवाम्।"

इति। पदं हंसः, रूपं बिन्दुः, रूपातीतं निरञ्जनं तत्त्वम्। तदुक्तं स्वच्छन्दसंग्रहे

"पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्तितः।
रूपं बिन्दुरिति ख्यातं रूपातीतं तु चिन्मयम्॥" 91

इति। पीठाः चत्वारः पिण्डपदरूपरूपातीतशब्देन तत्तत्स्थानानि आधारहृदयभ्रूमध्यब्रह्मरन्ध्राणि लक्ष्यन्ते। तेन क्रमात् तेषु स्थिताः तन्मया इत्यर्थः॥

तेषां पृथिवीवायुसलिलतेजोरूपतां सूचयन् तत्त्वभेदरूपमाह

चतुरस्रं तथा बिन्दुषड्बिन्दुयुक्तं च वृत्तकम्।
अर्धचन्द्रं त्रिकोणं च रूपाण्येषां क्रमेण तु॥

चतुरस्रं चतुरस्ररूपः कामपीठो भूतत्त्वमित्यर्थः। भूमण्डलस्य चतुरस्ररूपत्वात् बिन्दुषड्कं च वृत्तकं पूर्णगिरिपीठः षडबिन्दुयुक्तवृत्तरूपः वायुतत्त्वमित्यर्थः। वायुमण्डलस्य षडावर्तवद्वृत्तरूपत्वात् अर्धचन्द्रं जालन्धरपीठः अर्धचन्द्रमधोऽग्नित्वमधः अब्मण्डलस्य

---

१ ई० पु० चन्द्ररूपः इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अर्धचन्द्ररूपत्वात् त्रिकोणेषु उड्डियानपीठः त्रिकोणरूपः तेजस्तत्त्वमयः वह्निमण्डलस्य त्रिकोणरूपत्वात् क्रमेण कामरूपादिपीठानामेतानि रूपाणीत्यर्थः। अत्र रागनरूपस्थारूपत्वान्निरवयवत्वाच्च अनुक्तिः ॥

पीठानामेव क्रमेण वर्णनाह

पीतो धूम्रस्तथा श्वेतो रक्तो रूपं च कीर्तितम्।

पृथिवीवायुसलिलतेजसां क्रमेण पीतधूम्रश्वेतरक्तवर्णत्वात् पीठानामपि ते एव वर्णा इत्यर्थः। अवयवार्थः स्पष्टः[1] अत्र भूतानामक्रमः पीठानुसारेण पीठानां तु स्वात्माभेदेन क्रमस्य नियमात्[2] पीठश्वेतानि लिङ्गानि संस्थितानि ॥

पीठेषु लिङ्गान्याह

स्वयंभूबाणलिङ्गं च इतरं च परं पुनः।
पीठे श्वेतानि लिङ्गानि संस्थितानि वरानने[3] ॥

लीनं बाह्येन्द्रियागोचरं चिद्रूपमर्थं गमयन्तीति लिङ्गानि मनोहंकारबुद्धिचित्तात्मकानि कामरूपादीनि चित्समुल्लासाधारत्वात् पीठानि एतेषु अन्तःकरणचतुष्टयेषु तत्तद्वृत्तिचतुष्टयमयानि लिङ्गानि स्वयंभ्वादीनि सन्तीत्यर्थः। एतत् सर्वं सौभाग्यसुधोदये प्रपञ्चितम्[4]

"पुनरेव कामपीठे तदग्रकोणस्थिते मनोरूपे।
वृत्तिग्रथितं तज्ज्योतिः स्वयंभूलिङ्गं समीरितं सद्भिः॥

---

१ ख० पु० स्पष्ट एवेति पाठः। २ ख० पु० पीठेषु इत्यादि संस्थितानीत्यन्तं नास्ति।
३ क० ख० पु० श्वेतानि इति पाठः। ४ ख० पु० लिङ्गगोचरमिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दक्षिणकोणेऽहंकृतिरूपे ज्ञानन्धरे तु संक्रान्तम्।
परधाम बाणलिङ्गं जातं संक्रान्त्युपाधिभेदवशात्॥
मध्यत्रिकोणकोणे वामे श्रीपूर्णपीठमेतस्मिन्।
बुद्धिमधे परतेजः प्रतिफलितमितरलिङ्गतां यातम्।
चित्तमधे श्रीपीठे ज्योतिर्बिन्दोस्तदस्य संक्रान्तम्।
प्रतिफलितं परधाम्नः परलिङ्गं तत्प्रकीर्तितं[1] प्राज्ञैः॥"
इति॥

लिङ्गानां स्वरूपं पीतादिवर्णान् वैखरीवर्णांश्च विभज्याह

हेमबन्धूककुसुमशारच्चन्द्रनिभानि तु।
सुरावृतं त्रिकूटं च महालिङ्गं स्वयंभुकम्॥
कादितल्लाक्षरावृतं बाणलिङ्गं त्रिकोणकम्।
कदम्बगोलकाकारं थादिसल्लाक्षरावृतम्॥
सूक्ष्मरूपं समस्ताणावृतं परमलिङ्गकम्।
बिन्दुरूपं परानन्दकन्दं नित्यपदोदितम्॥

हेमनिभं पीतवर्णं त्रिकूटं बिन्दुत्रयकूटरूपं सुरावृतम् अकारादिषोडशस्वरावृतं स्वयंभूलिङ्गम्। बन्धूककुसुमनिभं रक्तवर्णं त्रिकोणरूपं कादितल्लादशरावृतं बाणलिङ्गम् शारच्चन्द्रनिभं श्वेतवर्णं कदम्बगोलकाकारं कदम्बकुसुमगोलकरूपं थादिसान्ताक्षरावृतमितरलिङ्गं परमलिङ्गस्य तेजोरूपत्वात् अवर्णत्वम् अतः सूक्ष्मरूपम् अनिन्द्रियगोचरम् अत

१ क० पु० प्रकीर्त्यते इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एव बिन्दुरूपं समस्तार्णवृतम् आदिक्षान्तपञ्चाशदक्षरा-
वृतं परलिङ्गं परानन्दकन्दं परा(ख्य)रूपायाः पश्य-
न्त्यादिशाखावटलतायाः आनन्दकन्दं नित्यपरोदि-
तं नित्यं च मातृकत्वात् उत्पत्तिविनाशरहितत्वात्
पदात् विश्वमुमुक्षुमनः प्राप्यात् उदितं प्रथमस्प-
न्दरूपतया ॥

सर्वाण्यपि बीजत्रितययुक्तायाः तुरीयविद्याया वा-
च्यरूपाणीत्याह

बीजत्रितययुक्तस्य सकलस्य मनोः[1] पुनः ।
एतानि वाच्यरूपाणि कुलकौलमयानि तु ॥

एतानि शक्तिचतुष्टयं पीठचतुष्टयं मातृकाचतुष्ट-
यं लिङ्गचतुष्टयं चेत्येतानि सर्वाणि बीजत्रितययुक्त-
स्य सकलस्य मनोर्वाग्भवकामराजशक्तिसमेतायाः
तत्त्रिखण्डिरूपायाः तुरीयविद्याया वाच्यरूपाणि वि-
द्यावाचकानि तानि सर्वाणि एव वाच्यानि अत एव
तच्चतुष्टयरूपिणीयं विद्येत्यर्थः। वाच्यवाचकयोरभे-
दात् कुलं मेयमानमातृलक्षणं कौलं तत्समष्टिः[2]
तन्मयानीत्यर्थः ॥

अमूनि पूर्वोक्तानि सर्वाणि चतुरात्मकानि जाग्रदा-
दिमयानीत्याह

जाग्रत्स्वप्नसुषुप्ताख्यतुर्यरूपाण्यमूनि तु ॥

जाग्रत् जागरितं देहेन्द्रियव्यवहारः, अन्तःकरण-
मात्रव्यवहारः स्वप्नः, सर्वेन्द्रियोपरतिसुखं तावन्मा-

---

१ क० पु० मनः इति पाठः। २ ख० पु० समष्टि इति पाठः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रपरामर्शः सुषुप्तिः, तुरीयं चैतन्यमात्रवृत्तिः। अत्रैव व-
क्ष्यति

"तव देवि महाजाग्रदवस्था त्विन्द्रियद्वयैः।"

इत्यादिना॥

चक्रस्य पूर्वं चतुरात्मकतामुक्त्वा तन्मध्यबैन्दवनिवा-
सिन्याः स्वविदस्तदतीतरूपतामाह

अतीतं तु परं तेजः स्वसंविदुदयात्मकम्।

अतीतं जागरितादिदशाचतुष्टयातीतम् अत एव परं
विश्वोत्तरत्वात् किंच परमनुत्तरं प्रकाशरूपम् अत्र च
श्रुतिः "तदेव ज्योतिषां ज्योतिः" इति स्वसंविदुदयात्मक-
मिति सर्वप्राणिष्वात्मतया स्थितं। तदुक्तं नवशतीशास्त्रे

अनर्कं परमं ज्योतिः सर्वप्राणिहृदि स्थितम्।

इति॥

चक्रस्य पुनर्वासनान्तरकथनाय विश्वातीतं वस्तु क-
थयित्वा वक्तव्य[1]वासनामाह

स्वेच्छाविश्वमयोल्लेख[2]खचितं विश्वरूपकम्।

विश्वमयोल्लेखः विश्वं षट्त्रिंशत्तत्त्वात्मकं तन्मय उ-
ल्लेखः उल्लिख्यते इत्युल्लेखः चित्रं तेन स्वेच्छाविश्व-
मयोल्लेखेन खचितं व्याप्तं स्वेच्छाकुलिकया आत्मभि-
त्तौ विश्वमुन्मीलयतीति। अत्र प्रमाणवचनम्

"जगच्चित्रं समालिख्य स्वेच्छाकुलिकयात्मनि।
स्वयमेव समालोक्य प्रीणाति भगवाञ्छिवः॥"

इति। ~~अत एव~~ विश्वरूपकम् अत एव शिवादिक्षित्यन्त-
रूपेण परिणतमित्यर्थः। यथा क्षीरं दध्याकारेण परिणमते॥

१ क० पु० वक्तव्यां ~~[illegible]~~ इति पाठः। २ क० पु० त्वेखाखचितमिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ननु चितिरेव विश्वाकारेण परिणमते तदुक्तमीश्वरप्रत्यभिज्ञाहृदये "चितिः स्वतन्त्रा विश्वसिद्धिहेतुः" इति तेन किमायातं देवस्येत्यत आह

चैतन्यमात्मनो रूपं निसर्गानन्दसुन्दरम् ।

चैतन्यं चिद्विमर्शशक्तिः आत्मनः प्रकाशात्मनः परशिवस्य रूपं निसर्गानन्दसुन्दरं तत्सामरस्येन सहजानन्दोल्लासात् अखिलस्पृहणीयम् । विमर्शशक्तिः प्रकाशात्मना परशिवेन सामरस्यात् विश्वं सृजति नतु केवला यथा न तुषेण केवलेन अङ्कुरो जायते नापि तण्डुलेन किन्तु ताभ्यां संयुतसिद्धिसंबन्धशालिभ्यां[1] तदुक्तं स्वच्छन्दसंग्रहे

शिवाभिन्ना पराशक्तिः सर्वक्रमशरीरिणी ।

इति ॥ तदेवाह

"मेयमातृप्रमामानप्रसरैः संकुचत्प्रभम् ।
शृङ्गाटरूपमापन्नमिच्छाज्ञानक्रियात्मकम् ॥"

मेयं प्रमेयं प्रमाविषयः सम्यगनुभवः प्रमा तद्वान् प्रमाता प्रमाकरणं प्रमाणं । तदुक्तं तन्त्रान्तरे

"मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥"

इति निर्विकल्परूपायाः स्वसंविदो मातृमेयप्रमाप्रमाणरूपेण निर्विकल्पकात्मना प्रसर एव संकोचः शिवस्य प्रकाशात्मनो जीवस्य शक्तिः विमर्शाख्यैव प्रमा सा तु निर्विकल्पात्मना विश्वाकारा मेयमातृप्रमाप्रमाणभेदसंकुचद्रूपा तथा शिवोऽपि संकुचद्रूपः एतदु-

१ क० पु० ताभ्यां संयुतेति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भयमिच्छाज्ञानक्रियात्मकम् इच्छादिवामादिशक्त्यंश-
भेदभिन्नशृङ्गाटरूपमापन्नं त्रिकोणरूपेण परिणतम् पूर्वं
"बीजत्रितययुक्तस्य सकलस्य मनोः पुनः।"
इत्यत्र कामकलादिकाया विद्यायाः श्रीचक्रहेतुभू-
तत्रिकोणमयपीठादिचतुर्मयतामुक्त्वा इदानीं देवताया
अपि तन्मयतामुक्तवानिति भावः ॥

तदेव विवृणोति विश्वाकारप्रथाधारेत्यादि स्फुर-
दूर्मिसमावृतम् इत्यन्तेन

विश्वाकारप्रथाधारनिजरूपशिवाश्रयम्[1] ।

विश्वाकारप्रथा षट्त्रिंशत्तत्त्वात्मना परिणता विम-
र्शशक्तिः तस्या आधारः निजं रूपं तात्त्विकं रूपं शि-
वः प्रकाशात्मकः स एव आश्रय आधारो यस्य तत्
का विश्वाधारप्रथाधारनिजरूपशिवाश्रयम् ॥

कामेश्वराङ्कपर्यङ्कनिविष्टमतिसुन्दरम् ।

परं तेजः कामेश्वराङ्कपर्यङ्कनिविष्टं कामेश्वरः प्र-
काशात्मकः शिवः तस्याङ्कपर्यङ्कनिविष्टं विमर्श-
शक्तिरूपम् अतिसुन्दरमिति अत्यन्तसुभगं सर्वैः स्वा-
त्मतया स्पृहणीयत्वात् ॥

इच्छाशक्तिमयं पाशमङ्कुशं ज्ञानरूपिणम् ।
क्रियाशक्तिमये बाणधनुषी च दधदुज्ज्वलम् ॥

इच्छाशक्तिरेव पाशो बन्धहेतुत्वात्, ज्ञानशक्ति-
रेव अङ्कुशो मनोमयगजस्य नियामकत्वात्, क्रिया-
शक्तिमये बाणधनुषी "शब्दस्पर्शादयो बाणा मनस्त-
स्याभवद्धनुरिति" वचनात् शब्दादिबाणानां मनसा ध-

१ क० पु० समाश्रियमिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नुधा संयोजनं क्रियाशक्तेरेव व्यापारः। अत्र इच्छाशक्तिमयं पाशं ज्ञानशक्तिमयमङ्कुशं क्रियाशक्तिमये बाणधनुषी एवमायुधचतुष्टयं स्वेच्छागृहीत कामकलामय विग्रहबाहुचतुष्टये दधत उज्ज्वलं चिदात्मकत्वात् ॥

आश्रयाश्रयिभेदेन षड्धा भिन्नहेतिमत् ॥

आश्रयः कामेश्वरः आश्रयि कामेश्वर्याख्यं परं तेजः एव आश्रयाश्रयिभेदेनाष्टधा भिन्नहेतिमत् हेतिरायुधं आश्रयस्य चत्वार्यायुधानि आश्रयिणश्चत्वारि चेति षड्धा भिन्नहेतिमत्। परशिव एव प्रकाशविमर्शात्मकौ निजावंशौ विभज्य कामेश्वरः कामेश्वरीति भूत्वा पाशाङ्कुशधनुःशरान् पुंस्त्रीभेदेन षड्धौ भूत्वा आश्रयाश्रयिभावेन स्वरूपमध्यत्रिकोणमध्यगत सदाशिवाख्यबैन्दवतुरीयबिन्दुमये परलिङ्गे निवसतीत्यर्थः॥

इदमेव मिथुनं नवधा विभज्य आत्मानं नवचक्रेषु स्थितमित्याह

अष्टारचक्रसंहृष्टं नवचक्रासनस्थितम्।

पूर्वोक्तक्रमेण तदेव वामादीच्छात्मयं त्रिकोणमेव त्रिधा विभिन्नं त्रिशक्त्येकवह्निभेदेनाष्टारचक्रमभूत् पुनस्तदेव शक्तिरूपं भूत्वा नवचक्रमभूत् एवंरूपं स्वयमेव श्रीचक्रमष्टारचक्रम्।

"चितिश्चेत्यं च चैतन्यं चेतना हृयकर्म च।
जीवः कला च देवेशि सूक्ष्मं पुर्यष्टकं मतम्॥"

इति स्वच्छन्दसंग्रहोक्त्या निजं सूक्ष्मं पुर्यष्टकं विभज्य अष्टारचक्रं वशिन्यादिरूपेण संहृष्टमित्यर्थः। नवचक्रा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सनस्थितम् एवंरूपं मिथुनमेव निजाधारनवकं नवचक्रत्वेन विभज्य निजनादशक्तिनवकं नवचक्रेश्वरीरूपेण संपाद्य

"इच्छादिशक्तित्रितयं पशोः सत्त्वादिसंज्ञकम् ।
महाचक्रत्र्यस्रं चिन्तयामि गुरुवक्त्रादनन्तरात् ॥
अष्टारांशप्रदेशोऽयं[1] विनिर्वाणैषणादिकम् ।
सूक्ष्मं पुर्यष्टकं देव्या मतिरेषा हि गौरवी ॥
अन्तर्दशारवसुधा ज्ञानकर्मेन्द्रियावलिः ।
महात्रिपुरसुन्दर्या इति संचिन्तयाम्यहम् ॥
बाह्यो दशारभागोऽयं बुद्धिकर्माक्षगोचरम् ।
चतुर्दशारवसुधा कारणानि चतुर्दश ॥
वस्वष्टदलपद्माङ्कदेशो यश्चक्रगो विभुः ।
अव्यक्ताद्याः प्रकृतयो भूतान्ता निश्चिनोम्यहम् ॥
षोडशच्छदपद्माङ्कदेशो भूताक्षमानसम् ।
विकारात्मकतापन्नं देव्याः संभावयाम्यहम् ॥"

इत्यादि सुभगोदयवासनोक्तरीत्या बैन्दवादिचतुरश्रान्तेषु नवचक्रेषु आसनभूतेषु इन्द्रियादिरूपेण स्थितमित्यर्थः ॥

एवंरूपं परं तेजः श्रीचक्रवपुषा स्थितम् ।

एवंरूपमुक्तप्रकारेण विभक्तनिजेच्छादिषोडशविकारान्तावयवमयत्रिकोणादिचतुरान्तश्रीचक्रवपुषा स्थितमित्यर्थः ॥

इत्थं तस्मिन् मिथुने श्रीचक्रवपुषा परिणते सति तदीयाः शक्तय एवावरणदेवतारूपेण स्थिता इत्याह

१ क० पु० प्रदेशोयमिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तदीयशक्तिनिकरस्फुरद्ऊर्मिसमाहृतम् ।

तयोः कामकामेश्वर्योरेव तदीयावयवः तेषां शक्तयः तासां निकराः समूहाः ते च स्फुरन्तः प्रकाशविमर्शमय कामेश्वर कामेश्वरीस्वेच्छागृहीतविग्रहेषु अवयवादिषु अवयवशक्तयोऽपि कामेश्वरीवज्रेश्वरीभगमालिन्याद्यावरणं परिवार्य तिष्ठन्तीत्यर्थः । एवम्भूतैर्यः तरङ्गः तैः समाहृतं परिवृतंम् । कोऽर्थः—ऊर्मिशब्देनेदं योत्यते प्रकाशात्मकः परमेश्वरः समुद्रो विमर्शरूपिणी कामेश्वरी सलिलं तदीयावयवाः शक्तिनिकरा ऊर्मयः यथा कल्लोलाः समुद्रे जायन्ते तत्रैव लीयन्ते एवं तत्त्वमयं शक्तिचक्रं तत्रैवोदेति अस्तमेति च तात्पर्यम् तत्र अभियुक्तवचनम्

"मूलोद्भवं शक्तिचक्रं यतस्तन्मयतां गतम् ।"

इति । "अस्मिन्नेवाव्यये तत्त्वे विलीनं परिभावयेत् ।

मूलं स्वात्मनि चिद्रूपे यद्यद्यत्तत्तदेव हि ॥"

इति ॥

सर्वचक्रवासनामुक्तो तेषु स्ववासनं मुद्राभेदमाह चिदात्मभित्तावित्यादि एवं चक्रमयं स्थितमित्यन्तेन

चिदात्मभित्तौ विश्वस्य प्रकाशामर्शने यदा ।
करोति स्वेच्छया भूर्णविचिकीर्षासमन्विता ॥
क्रियाशक्तिस्तु विश्वस्य मोदनाद्रावणात् तथा ।
मुद्राख्या ॥

चिन् विमर्शशक्तिः आत्मभित्तौ आत्मैव भित्तिरा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्मभित्तिः स्वरूपमेव भित्तिरित्यर्थः। विश्वस्य शिवादे-
र्भूम्यन्तस्य प्रकाशामर्शने यस्फुटस्फुटीकारः प्रकाशः,
हृदन्तया हृदयङ्गमीभावो विमर्शः। एवं विधे ये प्रकाश-
मर्शने यदा सृष्टिकाले पूर्णविचिकीर्षासमन्विता विक-
र्तुमिच्छा विचिकीर्षा विकारः क्षीरादीनामपि अस्ति
ह्यातञ्चनादिना अत एव पूर्णविचिकीर्षासमन्वितेति
क्षीरादेर्दध्यादिमात्रमेव विकारः अत्र तु शिवादि-
क्षित्यन्ततत्त्वाकारेण विकारः अत एव पूर्णविचिकीर्षा-
समन्विता क्रियाशक्तिस्तु क्रियाशक्तिरेव भूत्वा तुरव-
धारणे। एवंविधस्य विश्वस्य मोदनात् द्रावणाच्च अत्र
तु अनुकूलक्रियैव मोदनं द्रावणं तदेकरसीभावः
संविन्मुद्राख्यां लभते। अयमर्थः- यदा विमर्शशक्तिः
विश्वरूपेण विकर्तुमिच्छति तदा क्रियाशक्तिर्भूत्वा
स्वविकारभूतस्य विश्वस्य परचिदानन्दलक्षणेन मो-
दनेन तदैकरस्यलक्षणेन द्रावणेन च मुद्राख्यामाप-
न्नेत्यर्थः।

तत्रादौ व्यापिकां त्रिखण्डामुद्रामाह

सा यदा संविदम्बिका विकलामयी ॥
त्रिखण्डारूपसंपन्ना सदा संनिधिकारिणी।
सर्वस्य चक्रराजस्य व्यापिका परिकीर्तिता ॥

सा विमर्शरूपिणी संवित् विकलामयी वामाज्ये-
ष्ठारौद्रीरूपकलात्रयसमष्टिभूतत्वात्: अम्बिका भूत्वा
अम्बिकाग्रहणं शान्त्यतीताद्या अपि उपलक्षणम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इच्छाज्ञानक्रियारूपकलासमष्टिभूतत्वात् शान्तात्मिका-
पि भूत्वेत्यर्थः। त्रिखण्डारूपमापन्ना दक्षिणाङ्गुलयो
वामाद्याः प्रकाशांशाः वामाङ्गुलय इच्छाद्या वि-
मर्शांशाः तदुभयसंयोगरूपबन्धनात्मकखण्डत्रय-
वती त्रिखण्डा मुद्रा जातेत्यर्थः। सदा संनिधिकारि-
णी अत एव संविद्देवतायाः त्रिपुरायाः संनिधिका-
रिणी सर्वस्य चक्रराजस्य सर्वेषां चक्राणां पूजायन्त्रा-
णां श्रेष्ठत्वात् चक्रराजस्य व्यापिका नवचक्रस्थित-
नवमुद्राणां समष्टिभूतत्वात्॥

सर्वसंक्षोभिणीमुद्रामाह

योनिप्राचुर्यतः सैषा सर्वसंक्षोभिका पुनः।
वामाशक्तिप्रकारेयं द्वारचक्रे स्थिता भवेत्॥

सैषा त्रिखण्डा खण्डत्रयमुन्मोच्य योनिप्राचुर्यतो म-
ध्यमाद्वयसंयोगात् एका योनिः, अनामाद्वयसंयोगात्
अन्या योनिः, कनिष्ठाद्वयसंयोगात् अपरा। एवं योनि-
त्रयप्राचुर्यात् सर्वसंक्षोभिका परानन्दप्रवणत्वका-
रिणी वामाशक्तिप्रधानेयं सर्वसंक्षोभिनी मुद्रा वा-
माशक्तिप्रधानत्वात् सृष्टिः सृष्टिरेव क्षोभः द्वारचक्रे
चतुरस्रत्रयरूपे चतुर्द्वारवति त्रैलोक्यमोहने स्थिता॥

द्राविणीमाह

क्षुब्धविश्वस्थितिकरी ज्येष्ठाप्राचुर्यमाश्रिता।
स्थूलनादकलारूपा सर्वानुग्रहकारिणी॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सर्वाशापूरणाख्ये तु सैषा स्फुरितविग्रहा ।

क्षुब्धस्य विश्वस्य स्थितिकरी स्वसंविन्मात्रस्थितिकारिणी अतो ज्येष्ठाप्राचुर्यमाश्रिता ज्येष्ठाशक्तेः स्थितिहेतुत्वात् नादात् जाताः कलाः नादकलाः षोडश स्वराः अत्राभियुक्तवचनम् "कला नादस्वभावा वदन्त्यजा" इत्यादि तद्रूपाः कामाकर्षिण्याद्याः तद्रूपा सर्वाशापरिपूरकचक्रव्यापकत्वात् सर्वाशापरिपूरकाख्ये कामाकर्षिणीकलाधाररूपत्वात् अत एव सर्वानुग्रहकारिणी कामाकर्षणमेव सर्वानुग्रहः सैषा तच्छब्देन चतुःशतीशास्त्रोक्ता सर्वविद्राविणी परामृष्यते स्फुरितविग्रहा संविद्रूपत्वात् । कोऽर्थः—ज्येष्ठाप्राचुर्याधारत्वात् स्थितिरूपिणी अत एव ऋजुरूपमध्यमातर्जन्योः कनिष्ठानामयोश्च संयोगरूपिणी कामाकर्षिण्यादिरूपत्वात् सर्वानुग्रहकारिणी तदाधारत्वात् सर्वाशापरिपूरणाख्ये चक्रे संविद्रूपत्वात् स्फुरितविग्रहा चतुःशतीशास्त्रे प्रतिपादिता सैषा सर्वविद्राविणी मुद्रा स्थितेत्यर्थः ॥

सर्वाकर्षिणीमुद्रामाह

ज्येष्ठावामासमत्वेन सृष्टेः प्राधान्यमाश्रिता ।
आकर्षिणी च मुद्रेयं सर्वसंक्षोभिणी स्मृता ॥

ज्येष्ठावामासमत्वेन ज्येष्ठावामाद्वयसामरस्यरूपत्वात् सृष्टेः प्राधान्यमाश्रिता, सृष्टिरूपा वामा, स्थितिरूपा ज्येष्ठा, उभयसाम्यात् सृष्टिस्थितिसाधारणीयं वा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मांपुटेन वक्रतर्जनीमध्यद्वयरूपा ज्येष्ठांपुटेन ऋजुसंयुक्तानामिकाकनिष्ठाद्वयरूपेत्यर्थः अत एव वक्राङ्गुलिद्वयरूपत्वात् आकर्षिणीयं मुद्रा सर्वसंक्षोभिकाक्षिणी सर्वसंक्षोभकारिणि चक्रे स्मृता । स्मृतिः पूर्वानुभवसंस्कारजं ज्ञानं पूर्वं चतुःप्रातीशाख्यानुभूता इदानीं स्मृता सवासना कथितेत्यर्थः ॥

सर्वावेशकरीमुद्रामाह

व्योमद्वयान्तरालस्थबिन्दुरूपा महेश्वरि ।
शिवशक्त्यात्मसंश्लेषाद दिव्यावेशकरी स्मृता ॥
चतुर्दशारचक्रस्था संविदानन्दविग्रहा ।

आधाराद्याज्ञान्तषट्चक्रान्तरालानि बिन्दवः पञ्च व्योमानि तेषां द्वयोर्द्वयोर्मध्ये एकैको बिन्दुरिति पञ्च बिन्दवः पञ्चभूतमयाः । तदुक्तमभियुक्तैः

"पञ्चबिन्दुमयं भेदं पञ्चप्रणवषङ्जे ।"

इति । तद्रूपा व्योमद्वयान्तरालस्थबिन्दुरूपा शिवशक्त्यात्मसंश्लेषात् शिवात्मनो दक्षकराङ्गुलयः शक्त्यात्मनो वामकराङ्गुलयः शिवशक्त्यात्मना परिवृत्य इतरेतराङ्गुल्यन्तरालद्वयगतैकैकाङ्गुलिरूपा अन्योन्यगाढपातनात् एवंभूता दिव्यावेशकरी मुद्रा दिव्यस्य प्रकाशात्मनः शिवस्य आवेशकरी सामरस्यकरी चतुर्दशारचक्रस्था चतुर्दशारचक्रे सर्वसौभाग्यदायकचक्रे नामधेये स्थिता संवि-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न स्थिरा आनन्दविग्रहा शिवसामरस्यबिन्दुरूपलक्षणबन्धनात्मिकेयं मुद्रामयी संविदेकरस्यानन्दमयी चतुर्दशारचक्रे स्थितेत्यर्थः ॥

उन्मादिनीमुद्रामाह

विन्द्वन्तरालविलसत्सूक्ष्मरूपशिखामयी ।
ज्येष्ठाशक्तिप्रधानातु सर्वोन्मादनकारिणी ॥
दशारचक्रमास्थाय संस्थिता वीरवन्दिता ।

विन्द्वन्तरालादाधारब्रह्मरन्ध्रान्तर्गतयोनिमहाविन्द्वोः स्वयंभूपराख्ययोः लिङ्गयोरन्तरालात् विलसत्सूक्ष्मरूपशिखामयी विलसन्त्यौ सूक्ष्मरूपे विलसत्सुनिभाकृती शिवे शिखावत् शिवे अम्बिकापूजान्ते तन्मयी तदैकरस्यरूपा ज्येष्ठाशक्तिप्रधाना ज्येष्ठाशक्तिप्रचुरा सर्वोन्मादकारिणी उन्मादश्चित्तविभ्रमः सर्वान् उन्मत्तवत् स्वस्वव्यापारपराङ्मुखान् शिवशक्तिसामरस्यानुसंधानपरान् करोतीत्यर्थः । दशारचक्रमास्थाय दशारचक्रं बहिर्दशारचक्रं वीरवन्दिते इदन्तारिपोरहमि रणङ्गने प्रलयप्रतिपादनपरा वीराः तैर्वन्दिते आत्माहंभावभावनया भाविते तदुक्तं परापञ्चाशिकायाम्

"अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः ।
पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम् ॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति । कोऽर्थः - अन्तः कुलाकुलबिन्दुद्वयान्तरालविलसदम्बिकाप्राणाख्या वह्निमूर्तकुण्डलिनीरूपशक्तिशिवाख्यद्वयमध्यमाङ्कुशसंयोगाविन्दुद्वयाकारवर्तुलद्वयान्तरकनिष्ठाद्वयमयी ज्येष्ठाशक्तिप्रधानत्वात् ऋज्वाकृत्यनामातर्जनीद्वयाग्रसंयोगरूपा शिवशक्तिसामरस्यानुसंधानलक्षणबन्धनरूपा सर्वोन्मादिन्याख्या मुद्रा बहिर्दशारचक्रमाश्रित्य संस्थितेत्यर्थः ॥

महाङ्कुशमुद्रामाह

वामाशक्तिप्रधाना तु महाङ्कुशमयी पुनः ।
अधो विश्वं वमन्तीसा द्वितीये तु दशारके ॥
संस्थिता मोदनपरा मुद्रारूपत्वमास्थिता ॥

बिन्दुद्वयान्तरालविलसत्सूक्ष्मरूपशिवामयी ऋज्वाकृतितर्जन्यनामिकासंयोगरूपा वामाशक्तिप्रधाना तथा न भवति ऋज्वाकृतितर्जन्यनामिकासंयोगरूपा न भवति इदानीं वामाशक्तिप्रधाना "वामा विश्वस्य वमनाद्वङ्कुशाकारतां गता" इति पूर्वोक्तरीत्या वामाशक्तिप्रधानत्वात् वक्राकारतर्जनीबन्धनरूपाश्रिता विश्वं वमन्ती सृष्टिरूपत्वात् तद्वत् परमशिववत् द्वितीये दशारके अन्तर्दशारके मोदनपरा शिवसामरस्यलक्षणपरानुसंधानमयी अत एव मुद्रारूपत्वमास्थिता । अयमर्थः - पूर्वोक्तमुद्रा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लक्षणा विमर्शमयचिच्छक्तिरेव वामाद्याधान्यात् व्यक्तीभूतेत्यर्थः। तेनाद्वयपरमशिवसामरस्यपरानन्दप्रवणरूपा महाकुलामुद्राख्या अन्तर्दशारस्थितेति ॥

खेचरीमुद्रामाह

धर्माधर्मस्य संघट्टादुत्थिता चितिरूपिणी।
विकल्पोत्थक्रियारूपदोषविघातिनी ॥
विकल्परूपरोगाणां हारिणी खेचरी परा।
सर्वरोगहराख्ये तु चक्रे संविन्मयी स्थिता ॥

धर्माधर्मस्य संघट्टात् धर्मः भुक्तिः हृद्यादिसकलधर्मपरत्वात् अधर्मः शिवः तत्तत्सकलधर्मरहितत्वात् तस्य संघट्टः सामरस्यं तस्मादुत्थिता चितिरूपिणी चितिः संवित्तिः विकल्पोत्थक्रियेति विकल्पः कोटिद्वयावलम्बनमू एवं वा नवेति संशयज्ञानं विकल्पः विकल्पोत्थाः क्रिया नित्यनैमित्तिककाम्यरूपाः तल्लोपेन पापं जायते तस्य विघातिनी विकल्परूपरोगाणां हारिणी पारपूर्णभावस्य शिवस्य संघेनैतत् कर्तव्यमू एवं नेति विकल्परूपा रोगा आधय एव व्याधयः तदुक्तमभियुक्तैः

"अपूर्णमन्यता व्याधिः कार्पण्यैकनिधानभूः।
क्लेशावहोऽतिकष्टश्च ॥"

इति नवां हारिणी, खेचरी

"वे समस्तसकलक्रियाक्रमे
धा चितिश्चरति शाश्वतोदधौ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सा शिवत्वसमवायिकारिणी
खेचरी सकलखेदहारिणी ॥"

इति तदुक्तरीत्या निर्विकल्पकबोधभूमिसंचारिणी चितिशक्तिः परमशिवसामरस्यरूपा तदधिष्ठितत्वात् सर्वरोगहराख्ये चक्रे संविन्मयी स्थिता । कोऽर्थः—शिवशक्तिसमदक्षवामबाहुद्वयपरिवर्तनरूपा तर्जनीद्वयावलम्बितव्युत्पत्तिकरद्वयकनिष्ठिकानामिकाद्वन्द्वं तदुपरिस्थितमध्यमाद्वयसंयुक्ताङ्गुष्ठद्वयाग्रसंयोजनलक्षणबन्धनरूपा शिवशक्तिद्वयसंघट्टादुत्थिता यदा निर्विकल्पबोधभूमिसंचारिणी अत एव विकल्पजनितानित्यनैमित्तिककाम्यकर्मलोपरूपदोषविघातिनी अत एव च विकल्परूपरोगाणामपूर्णमन्यतालक्षणानां हारिणी सर्वरोगहराख्ये चक्रे खेचरीमुद्रा स्थितेत्यर्थः ॥

बीजमुद्रामाह

शिवशक्तिसमाश्लेषः सुरह्यो मान्तरे पुनः ।
प्रकाशयन्ती विश्वं सा सूक्ष्मरूपस्थितं सदा ॥
बीजरूपा महामुद्रा सर्वसिद्धिप्रदे स्थिता ॥

शिवशक्त्योः समाश्लेषः सामरस्यं तन्मये सुरह्यो मान्तरे प्रकाशविमर्शसूक्ष्मान्तरगगनान्तराले सूक्ष्मरूपस्थितं कारणतावच्छेदेन स्थितं विश्वं सदा सर्वदा प्रकाशात्मनि अत एव बीजरूपा महामुद्रा तस्याः चराचरविश्वोत्पत्तिहेतुत्वात् सर्वस्य शिवादेर्भूम्यन्तस्य

सर्वसिद्धिप्रदे विश्वोत्पत्तिहेतुभूतबीजमुद्राधारत्वात्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सिद्धिहृत्यन्तिः। तदुक्तमीश्वरप्रत्यभिज्ञाहृदये "चितेः स्वतन्त्रा विश्वसिद्धिहेतुः" इति तन्मये चक्रे स्थिता। कोऽर्थः—शिवशक्तिसंज्ञितोभयकरव्यस्तकनिष्ठिकाङ्ग्यावलम्बनवक्रोभयानामिकोभयपार्श्वप्रवृत्तसंघुक्काग्रमध्यमाद्वयोपरिस्थितवक्राकारतर्जन्याङ्गुष्ठयुगलाग्रसमाश्लेषान्तरालप्रतीयमाननभोनान्तराले कारणतन्मात्रतया स्थितं विश्वं प्रकाशयन्ती बीजमुद्रा सर्वसिद्धिमये चक्रे स्थितेति ॥

योनिमुद्रामाह

संपूर्णस्य प्रकाशस्य लाभभूमिरियं पुनः।
योनिमुद्रा कलाहृप्या सर्वानन्दमये स्थिता ॥

संपूर्णस्य प्रकाशात्मनः परमशिवस्य लाभभूमिः प्राप्तिस्थानं अत एव योनिमुद्रा। योनिहृप्या मुद्रा योनिः त्रिकोणं वामादीच्छाशक्तित्रितयधामरूपत्रिकोणहृपिणी कलाहृप्या हार्धकलात्मकविमर्शहृप्या अत एव सर्वानन्दमये शिवशक्तिसामरस्यसमुदितपरानन्दलक्षणबिन्दुहृपसर्वानन्दमयनाम्नि चक्रे स्थिता। कोऽर्थः—वामेच्छाहृपवक्रतर्जनीद्वयाग्रगृहीतव्यस्तानामिकाद्वयाग्रपरिगतज्ञेच्छाज्ञानमयवक्रसंघुक्काग्रमध्यमाद्वयमध्यगतक्रौड्रीक्रियात्मकनिष्ठाद्वयाग्रयोजितसंपूर्णप्रकाशहृपाङ्गुष्ठद्वयाग्रहृप्या विमर्शकलाहृपमध्यी योनिमुद्रा प्रकाशविमर्शसामरस्यलक्षण-

१ क० पु० 'वक्राकारेति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

बिन्दुमयं सर्वानन्दमये चक्रे स्थिता इत्यर्थः॥

तदुक्तमुपसंहरति

क्रिया चैतन्यरूपत्वादेवं चक्रमयं स्थितम् ॥

क्रिया क्रियाशक्तिः विश्वस्य मोदनात् द्रावणात्तथा-हृत्युक्तम् प्रक्रान्ता क्रिया भेदेन विरचनामयवामादि-शक्तिप्राधान्यभेदात् संक्षोभिण्यादियोन्यन्ततत्तन्मुद्रारूपेण चैतन्यस्वरूपत्वात् चक्रमयं त्रैलोक्यमोहनादि सर्वानन्दमयान्तनवचक्रमयं स्थितमित्यर्थः।

ननु

"यदा सा परमा शक्तिरिच्छया विश्वरूपिणी।"

इत्युपक्रान्तं पुनः

"क्रिया चैतन्यरूपत्वान्नवचक्रमयं स्थितम् ॥"

इत्युपसंहियते नर्हि महाप्रकृतोपसंहारस्त्वयमित्याशङ्क्याह

इच्छारूपं परं तेजः सर्वदा भावयेद्बुधः।

परं तेजः शिवशक्तिसामरस्यरूपपरामयं ज्योतिः इच्छास्वरूपं स्वेच्छाकल्पितनानारूपप्रपञ्चमयं सर्वदा कालत्रयेपि भावयेत् बुधः साक्षात्परशिवरूपनिजगुरु-कटाक्षपातेन

"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।

कुलं शीलं च जातिश्चेत्यष्टौ पाशाः प्रकीर्तिताः॥"

इत्यभियुक्तवचनोक्तपरिपाटितपाशाष्टकतया परिमुक्तेच्छाहंभावः स्वेच्छया कल्पितनानारूपप्रपञ्चमयं स्वीचक्ररूपेण परिणतं परामयं तेजः सर्वदा भावयेदि

---

१ क० पु० चक्रान्तेति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्यर्थः ॥

पुनरस्यैव चक्रस्य प्रकारान्तरेण वासनान्तरमाह

क्रिया च नवधा चैव चक्रसंकेतनः पुनः ।

स्पष्टम् ॥

तत्रादौ त्रिधात्ववासनान्तरमाह

वह्निनैकेन पाक्तिभ्यां द्वाभ्यां चैकः परः पुनः ।

तैश्च वह्नित्रयेणापि पाक्तीनां त्रितयेन च ॥

षड्द्वयेन चान्यः स्याद्भूगेहत्रितयेन च ।

पञ्च पाक्तिचतुर्वह्नि षड्द्वयमहीत्रयम् ॥

पूर्णं महाचक्रमिति ।

एकेन वह्निना द्वाभ्यां पाक्तिभ्यामेकः प्रकारः तैश्च एकवह्निना पाक्तिद्वयबैन्दवत्रिकोणैः पुनः वह्नित्रयेण पाक्तीनां त्रितयेन च अपरः प्रकारः । अयमर्थः—त्रिकोणानामेवोपरि विस्तारक्रमेण पुनर्वह्नित्रयेण पाक्तित्रये ज्ञाते परः प्रकारो भवतीति षड्द्वयेन भूगृहत्रितयेन च अन्यः षड्द्वयेरेखान्तरालयोरष्टदलषोडशदलं चेति भूगृहत्रयं चतुरस्रत्रयम् एवं कृते सति पञ्च पाक्तयः चत्वारो वह्नयः षड्द्वयं महीत्रयं चेति परिपूर्णं महाचक्रं समष्टिरूपम् ॥

तत्त्वकारत्रयमेव विविच्य विवृणोति

तत्त्वकारः प्रदर्श्यते ।

तत्राद्यं नवयोनिः स्यात्तेन-द्विदशासंयुतम् ॥

मनुयोनिः परं विद्यात्तृतीयं तदनन्तरम् ।

अष्टद्व्यष्टदलोपेतं चतुरस्रत्रयान्वितम् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चक्रस्य त्रिप्रकारत्वं कथितं परमेश्वरि ।

तत्प्रकारः जातावेकवचनम् । तत्प्रकाराः प्रदर्शयन्ते इत्यर्थः । तत्र तेषु प्रकारेषु आद्यं नवयोनिः वह्निना एकेन शक्तिभ्यां ताभ्यामित्यस्य विवरणम् एकस्य वह्नेः द्वयोः शक्त्योश्च संयोगे सति बैन्दवत्रिकोणाष्टकोणैः नवयोनिचक्रं भवेदित्यर्थः । तेन द्विदशारसंयुतं मनुयोनिः परं विद्यात् तेन नवयोनिचक्रेण संयुतं द्विदशारसंयुतं दशारद्वयसंयुतं मनुयोनिः चतुर्दशारकोणं परं द्वितीयं जानीयात् तैश्च वह्नित्रये शक्तित्रितये च कृते दशारचक्रद्वयं चतुर्दशारचक्रं च चक्रत्रितयं द्वितीयचक्रं च भवतीत्यर्थः । तदनन्तरं अष्टच्छदलोपेतं चतुरस्रत्रयान्वितम् तदनन्तरं तेन चक्रद्वयेन अनन्तरमव्यवधानेन स्थितम् अत्यन्तमव्यवहितम् अष्टदलकमलेन षोडशदलकमलेनोपेतम् चतुरस्रत्रयात्मकं तृतीयचक्रं भवतीत्यर्थः । एकेन चक्रावयवत्रितयस्य प्रत्येकस्य सृष्टिस्थितिसंहारभेदात् क्रोडीकरणात् । तद्यथा चतुरस्रत्रयं सृष्टिसृष्टिः, षोडशदलपद्मं सृष्टिस्थितिः, अष्टदलपद्मं सृष्टिसंहारः । एवं चक्रमयं सृष्टिमयत्वात् । एवं चतुर्दशारे स्थितिसृष्टिः, बाह्यदशारे स्थितिस्थितिः, अन्तर्दशारे स्थितिसंहारः । एवं चक्रमयं स्थितिमयत्वात् । एवमष्टकोणं संहारसृष्टिः, त्रिकोणं संहारस्थितिः, बैन्दवं संहारसंहारः,

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवं चक्रमयं संहारमयत्वात् बैन्दवं चक्रमारभ्य चतुरश्रान्तोद्धारः सृष्टिरित्यर्थः ॥

एवं सर्वमेतन्मनसि निधायाह

चक्रस्य त्रिप्रकारत्वं कथितं परमेश्वरि ॥

ननु त्रैविध्यमुक्तं तर्हि इदं चक्रं मध्यचक्रमारभ्य किमुत्पादयितुं न शक्यते इत्याशङ्क्याह

सृष्टिस्थं नवयोन्यादि पृथ्व्यन्तं संहृतिः पुनः।
पृथ्व्यादि नवयोन्यन्तमिति शास्त्रस्य निर्णयः॥

संहृतिः पुनः पृथ्व्यादि नवयोन्यन्तमित्यत्र नवयोनिशब्देन योन्यन्तर्गतं बैन्दवं चक्रं लक्ष्यते। तथा च चतुरस्रत्रयमारभ्य बैन्दवान्तमुद्धारः संहारः इत्यर्थः। इति चतुःशतीशास्त्रस्य निर्णयः श्रुतो न मध्यमादिचक्रमुद्धारयतीति तात्पर्यम्। देवदत्तविष्णुदत्तयज्ञदत्तेषु देवदत्तयज्ञदत्तयोः फलानि देयानीत्युक्ते विष्णुमित्रस्य न देयानीत्युक्तेति गम्यते ॥

पूर्वं श्रीचक्रमवयवशो विभज्य वासनामुक्त्वा इदानीं समष्टिचक्रस्य वासनामाह

एतत्समष्टिरूपं तु त्रिपुराचक्रमुच्यते ।

एतत्समष्टिरूपं सृष्ट्यादित्रितयं समष्टिनाम सवयवी तु तथा न भवति सृष्टिपदेन स्थितिपदेन संहारपदेनापि नाभिधीयते त्रिपुराचक्रमुच्यते त्रिपुराद्याः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हृद्यादिमध्यत्रिमध्यः पुरा विद्यमानत्वात् तत्पदेनाभिसंधेयायाः अनाद्यन्तरूपायाः स्वसंविदश्चक्रसाविर्भावभूमिरित्युच्यते। तदुक्तं संकेतपद्धत्याम् "चक्रिन्योऽष्टौ सान्तरात्मभू" इत्यादिना "अनाख्या सर्वगा तत" इत्यन्तम् ॥

ननु संविद्रूपा त्रिपुरैव सा ज्ञायतां किमनेन चक्रवासनालक्षणेन क्रमबन्धविधिप्रयासेनेत्यत आह

यस्य विज्ञानमात्रेण त्रिपुराज्ञानवान् भवेत्।

यस्य विज्ञानमात्रेण यस्मिन् विज्ञाते एव त्रिपुराचक्रज्ञानमात्रेण त्रिपुराज्ञानवान् ज्ञाता। कोऽर्थः—शुद्धनिराकारमूर्त्तेः त्रिपुराया ज्ञानमशक्यम् अत एवोक्तरीत्यैव एतच्चक्रवासनायाः तन्मध्यबैन्दवक्रोडीकृता सा विज्ञातुं शक्येत्यर्थः। तदुक्तमभियुक्तैः

"परकाद्वैतनच्चक्रं महायोगविदं परम्।
कुतहेमघनीभावमिव मूर्त्तिं करोम्यहम् ॥"

इति ॥

चक्रस्य पूर्वमुद्दिष्टं नवधात्वमिदानीं वक्तुं प्रतिजानीते

चक्रस्य नवधात्वं च कथयामि तव प्रिये।
यतः प्रियतमासि त्वम् अतो रहस्यमपि कथयामीत्यर्थः॥

इदानीं नवधात्वमाह

आदिमं भूत्रयेणस्याद्वितीयं षोडशारकम्।
अन्यदष्टदलं प्रोक्तं मनुकोणमनन्तरम् ॥
पञ्चमं दशकोणं स्यात् षष्ठं चापि दशारकम्।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सप्तमं बहुकोणं स्यान्मध्यं त्र्यस्रमथाष्टकम् ।
नवमं त्र्यस्रमध्यं स्यात् ॥
भूत्रयेण चतुरस्रेण मनुकोणं चतुर्दशकोणं स्पष्टमन्यत् ॥
उक्तानां नवानां नामान्याह चक्राणां/
तेषां नामान्यतः शृणु ।
त्रैलोक्यमोहनं चक्रं सर्वाशापरिपूरकम् ॥
सर्वक्षोभकरं देवि सर्वसौभाग्यदायकम् ।
सर्वार्थसाधकं चक्रं सर्वरक्षाकरं परम् ॥
सर्वरोगहरं देवि सर्वसिद्धिप्रदं तथा ।
सर्वानन्दमयं चापि नवमं शृणु पार्वति ॥

१ त्रैक्यलोक्यमोहनं लोक्यत इति लोकः लोक्यतेऽनेनेति वा लोकः लोकघनीति लोक इति कर्मकरणकर्तृव्युत्पत्त्या मेयमानमातृलक्षणं त्रैलोक्यं तस्य मोहनं तिरोधाय त्रैलोक्यघनीतिव्युत्पादनेन सर्वाशापरिपूरकम् आशा नाम तृतस्य पदान्तरेषु स्पृहा तस्याः सर्वस्याः स्पृहायाः परिपूरकं नित्यपरिपूर्णतृप्तिलक्षणं परमशिवसामरस्यप्रतिपादनेन सर्वक्षोभकरं सर्वस्य क्षित्यादेः शिवान्तस्य उपर्युपरि तत्त्वक्रमेण क्षोभस्य संहारलक्षणस्य कारकं भेदप्रपञ्चलयरूपत्वात्, सर्वसौभाग्यदायकं सर्वसौभाग्यं सर्वस्पृहणीयता तस्य च दायकं, सर्वस्पृहणीयपरप्रेमास्पदपरमशिवैक्यप्रतिपादनेन सर्वार्थसाधकं सर्वेषां वैदिकानां तान्त्रिकाणां

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्रियाणामपि अर्थः प्रयोजनं परशिवप्राप्तिः। तदुक्तं महाकविभिः कालिदासपादैः

"बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥"

इति। तत्साधयति सर्वरक्षाकरं रक्षानाम प्रतिकूलपदार्थान् अपहरति तत्परिहारः षट्त्रिंशात्तत्त्वात्मकं सर्वमेव प्रतिकूलपदार्थः, तस्मात् सर्वस्माद्रक्षां शिवाहंभावभावनालक्षणां करोति। तदुक्तं परापञ्चाशिकायाम्

"अहन्नि प्रलयं कुर्वन्निदमः प्रतियोगिनः।
पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम् ॥"

इति। सर्वरोगहरं भेदलक्षणं षट्त्रिंशात्तत्त्वात्मकं सर्वमेव रोगः तस्य हरम् अभेदप्रतीतिहेतुत्वात् अत्रैवोक्तम्

"विकल्पहृपरोगाणां हारिणी खेचरी परा।"

इति। सर्वसिद्धिप्रदं सर्वस्य स्थितिहत्पत्तिः स्थितिः संहारश्च तन्मयं त्रिकोणं सर्वसृष्टिस्थितिसंहारहेतुत्वात्, तदुक्तं श्रीपत्यभिज्ञाहृदये "चितिः स्वतन्त्रा विश्वसिद्धिहेतुः" इति। सर्वानन्दमयं शिवशक्तिलक्षणविमर्शप्रकाशसामरस्यहृपत्वात् अत्र सर्वत्र प्रवृत्तिनिवृत्तिभेदात्

8/ ~~अद्वैतभेदात्~~ अद्वैतविश्रान्तिरेव परमार्थः ॥

पूर्वोक्तवासनाचक्रस्य प्रयोजनमाह

अत्र पूज्या महादेवी महात्रिपुरसुन्दरी ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

महादेवी महती देवी कालाकारैरनाकलितत्वात् देवी द्योतनादिति देवी पराभिधेया विमर्शरूपा सा त्रिधा च नवधा च पूर्वोक्तवासने चक्रे, महात्रिपुरसुन्दरी महती अनावरणचिद्रूपिणी त्रिपुरा तुरीयरूपत्वात् सुन्दरी स्वात्मरूपतया सर्वसंहरणीयत्वात् एवंविधा संविद्देवता पूज्या वक्ष्यमाणपरादित्रिविधरूपया पूजया भावनीया ॥

त्रैलोक्यमोहनादिनवचक्राणां स्वस्वनामानुरूपलक्षणफलानीत्युक्त्वा इदानीं समष्टिचक्रस्य फलमाह

परिपूर्णं महाचक्रमजरामरकारकम् ।

परिपूर्णं महायोनिमध्यमहाबिन्दुस्फुरत्प्रकाशविमर्शसामरस्यरूपप्रभापटलमध्यसर्वानन्दमयं विश्वमयं विश्वोत्तीर्णपरामयत्वात् अजरामरकारकम् अजरः कालत्रयातीतत्वात् अमरः अत एव विनाशोत्पत्तिरहितत्वात् अजरामरः शिवः स्वभजकस्य कालातीतनित्यपरशिवसायुज्यलक्षणमित्यर्थः ॥

चक्रसंकेतमुपसंहरति

एवमेष महाचक्रसंकेतः परमेश्वरि ।
कथितस्त्रिपुरादेव्या जीवन्मुक्तिप्रवर्तकः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवमुक्तप्रकारेण त्रिपुरादेव्याः पूर्वोक्तलक्षणायाः महाचक्रसंकेतः परब्रह्मात्मचक्ररूपत्वात् महाचक्रं जीवतो मुक्तिः जीवन्मुक्तिः। मुक्तिर्हि बन्धनादुन्मोचनं, बन्धनं घृणादिपाशाष्टकेन, परशिवादिगुरुपरमदेवताधिष्ठानपरमार्थः चक्रसंकेतः स्वपरामर्शोत्थ हठादेव सकलपापनाशनेन शिवाहंभावभावनां प्रवर्तयतीत्यर्थः ॥

इति श्रीमत्परमहंसयोगीन्द्रश्रीपुण्यानन्दशिष्यामृतानन्दनाथयोगिप्रवरविरचितायां योगिनीहृदयदीपिकायां चक्रसंकेतो नाम प्रथमः पटलः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्वितीयं संकेतं श्रोतृजनप्रबोधनये कलप्तिपादनपूर्वकं वक्तुं प्रतिजानीते

मन्त्रसंकेतकं दिव्यमधुना कथयामि ते ।
यद्वेत्ता त्रिपुराकारो वीरचक्रेश्वरो भवेत् ॥

दिव्यं प्रकाशविमर्शात्मकपरशिवपरिपूर्णक्रियप्तिपादनपरत्वात् मन्त्रसंकेतकं मननात् त्रायते साधकमिति मन्त्राः चिन्मरीचयः, तद्वाचकत्वात् वैखरीवर्णविन्यासभूतानां सौभाग्यविद्यादीनां मननत्राणना । तदुक्तं संकेतपद्धत्यामु

"मननात् त्राणधर्मोऽसौ मन्त्रोऽयं परिकीर्तितः ।"

इति संकेतं पूर्वोक्तलक्षणं प्रकाशात्मकोऽहं ते विमर्शात्मकपिण्डाः कथयामि हृदयंगमतां नयामीत्यर्थः । यद्वेत्ता यस्य मन्त्रसंकेतस्य वेत्ता ज्ञाता त्रिपुराकारः वेदनसंपरिस्फुरत्यरमभहारको वीरचक्रेश्वरो भवेत् । वीराः पूर्वोक्तलक्षणाः तेषां चक्रं समूहः तस्येश्वरः परमशिवः । कोऽर्थः—एतन्मन्त्रसंकेतप्रतिपादितश्रीविद्यादिमन्त्रार्थस्य भूतिपरो भावनाप्राधान्यप्रधानो परमशिव एव भवेदित्यर्थः ॥

पूर्वमनन्तरोक्तनीत्या त्रैलोक्यमोहनादिनवचक्रेश्वरीमन्त्रानेवोपक्रम्य मन्त्रसंकेतमारभते

करशुद्धिकरी त्वाद्या द्वितीया चात्मरक्षिका ।
आत्मासनगता देवि तृतीया तदनन्तरम् ॥
चक्रासनगता पश्चात् सर्वमन्त्रासनस्थिता ।
साध्यसिद्धासना षष्ठी माया लक्ष्मीमयी परा ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मूर्त्तिविद्या च सा देवि सप्तमी परिकीर्तिता।
अष्टम्या वाहनीविद्या नवमी भैरवी परा ॥
मूलविद्या तथाख्याता त्रैलोक्यवशकारिणी।

करशुद्धिकरी "आत्मतत्त्वमलयोरशुद्धयोः अत्र कर्मकरणात्मनोः द्वयोः। शुद्धतत्त्वलयभावनामयी शुद्धिः आत्मकरयोः परा मता॥" इत्यस्मदुक्तरीत्या कर्मेन्द्रियान्तःपातिनोः करयोः अशुद्धतत्त्वान्तर्गतयोः अशुद्धयोः शुद्धतत्त्वलयभावना शुद्धिः तत्करीयं विद्या पराहन्ताप्रतिपादनपरत्वात् अत्रैव वक्ष्यति

"कर्मेन्द्रियाणां वैमल्यात्करशुद्धिकरी स्मृता।"

इति। आद्या त्रैलोक्यमोहनचक्रेश्वरीत्यर्थः। ननु करशुद्ध्यादिमन्त्राणां संख्यामेव करोति किमिति नोद्धरति उच्यते कामकेश्वरशास्त्र एव असावुद्धार उक्तः अत्र त्वज्ञातार्थप्रतिपादनपरत्वादस्य शास्त्रस्य च न मन्त्रोद्धारः क्रियते इति। द्वितीया चात्मरक्षिकेति भेदलक्षविपक्षसंकटो परमिहात्मरक्षणम्। इत्यस्मद्गुरूक्तरीत्या भेदप्रपञ्चलक्षणप्रतिपक्षसंकटात् रक्षामभेदप्रतिपत्तिरूपां पराहन्ताप्रतिपादनेन च आत्मनः करोति इत्यात्मरक्षिका द्वितीया सर्वाशापरिपूरणाख्य द्वितीयचक्रेश्वरी विद्या इत्यर्थः। आत्मासनगता देवि तृतीया

"अष्टचक्रमनुदेवतात्मनां
सा विमर्शमनयत् स्वभासनम्।"

इत्यस्मद्गुरूक्तनीत्या साधकचक्रमन्त्रदेवतानां स्वसंविद्रूपतया अनुसंधानलक्षणा मनुचतुष्टयवि-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्यानामादिभूता आत्मासनगता विद्या तृतीया सर्वसं-
क्षोभलक्षण तृतीयचक्रेश्वरी विद्येत्यर्थः । तदनन्तरं
चक्रासनगता अनन्तरं चक्रसंकेतकोक्त ~~वासना~~ चक्रा-
सनयुक्ता चतुर्थी विद्या, सर्वसौभाग्यदानलक्षणचतु-
र्थचक्रेश्वरी विद्येत्यर्थः । पश्चात् सर्वमन्त्रासनस्थिता
अनन्तरोक्तवासनामननत्राणचिन्मरीचिप्रसराखिला-
वरणदेवतामन्त्रासनस्थिता पञ्चमी विद्या, सर्वार्थ-
साधनलक्षणपञ्चमचक्रेश्वरी विद्येत्यर्थः । साध्यसि-
द्धासना षष्ठी

"सर्वपीठनिवासिन्यः सर्वगाश्चिन्मरीचयः ।
रम्यास्तावत्पराकारा रक्षन्तु कुलमातरः ॥"

इति प्रमाणवचनोक्तरीत्या चिन्मरीच्यावरणदेवताः
साध्याः सप्तसंख्या त्रिकोणादिषोडशदलान्तचक्रपद-
गताः चतुरस्रपदगताश्च देवताः सृष्टिक्रमरूपत्वात्
साध्या तदुक्तमत्रैव

"सृष्टिस्थं नवयोन्यादिपृथ्व्यन्तं संहृतिः पुनः ।
पृथ्व्यादिनवयोन्यन्तम् ॥"

इति । अत्र सृष्टिसंहारः । तदुक्तं श्रीप्रत्यभिज्ञाहृदये
"चितिः स्वतन्त्रा विश्वसिद्धिहेतुः" इति एवं सृष्टिसंहारक्र-
मेणानुसंधीयमानानां साध्यसिद्धावरणदेवतानामास-
ने स्थिता विद्या साध्यसिद्धासना षष्ठी, सर्वरक्षाकर-
नामधेयषष्ठचक्रेश्वरी विद्येत्यर्थः ।

मायालक्ष्मीमयी परा ।
मूर्तिविद्या च सा देवि सप्तमी परिकीर्तिता ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति अस्या विद्यायाश्चतुःशतीशास्त्रे अनुद्धृतत्वात् अत्रो-
द्धारः क्रियते। माया भुवनेश्वरीबीजं लक्ष्मीः श्रीबीजं त-
न्मयी तत्प्रचुरा तद्वयोर्ध्वगता परा

"चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम् ।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः ॥"

इति परात्रिंशोक्तबीजं परावाचकत्वात् तद्बीजत्रयात्मि-
का मूर्त्तिः। विद्या च सप्तमी सर्वरोगहराभिधानचक्रेश्व-
री विद्या इत्यर्थः। अष्टम्यावाहनी विद्या

"अन्तरस्य निजसंविदात्मनो
मातुरक्षकरणात्मना बहिः।
मेयसंविदि संविमर्पणं सदा-
वाहनं समरसत्वमोक्षणम् ॥"

इत्यस्मद्गुरूक्तरीत्या हृदयकमलकर्णिकामध्ये स्फुरन्त्याः
संवित्कलायाः "आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रि-
यमर्थेन" इति तन्त्रान्तरोक्तपरिपाट्या बहिःप्रसारणल-
क्षणावाहनविहिताष्टमी, सर्वसिद्धिप्रदाभिधानाष्टमच-
क्रेश्वरी विद्येत्यर्थः। नवमी भैरवी परा, भैरवी विश्वस्य भ-
रणात् स्थितिहेतुतया च क्षणात् परचिन्मात्रपर्यवसान-
लक्षणसंहारकारणतया वमनात् सृष्टिहेतुतया च ॥

ननु भैरवी चतुःशतीशास्त्रे नोक्ता किमित्यत्र नोद्धृता
सप्तमचक्रेश्वरी विद्या चोद्धृता इत्यत आह

मूलविद्या तथा प्रोक्ता त्रैलोक्यवशकारिणी।

मूलं विश्वस्य शिवादेर्भूम्यन्तस्य षट्त्रिंशत्तत्त्वात्मनः
प्रकाशविमर्शसामरस्यरूपं तेजो वेदयतीति मूलविद्या

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तथा प्रोक्ता भैरवी कथिता नान्या यस्मात्तत्रैवोद्भूतत्वात् नात्रोद्धारः। अन्यथा सप्तमचक्रेश्वरीवत् अत्रोद्धरेत्। वक्ष्यति

"मूलेन व्यापकन्यासः कर्तव्यः परमेश्वरि।"

इति त्रैलोक्यमुक्तलक्षणं वपुरीकरोति सर्जनसंहारैः स्वायत्तं करोति॥

वक्ष्यमाणपूजासंकेतं वक्तुं योग्यमपि न्यासं नवचक्रेश्वरीविद्यानां प्रसङ्गात् मण्डूकप्लुतिन्यायेनाह

एवं चक्रप्रकारास्तु पूजाकाले प्रयत्नतः।
एताः क्रमेण न्यस्तव्याः साधकेन कुलेश्वरि॥

एवमुक्तप्रकारेण नवप्रकारास्त्वेता श्चक्रेश्वरीविद्याः साधकेन एतद्विद्याभ्यासकेन मोक्षमात्मनः साधयितुमिच्छता कुलेश्वरि कुलं मेयमानमातृरूपं। तदुक्तं चिद्गगनचन्द्रिकायाम्

"मेयमानमितिलक्षणं कुलं
भ्रान्ततो ब्रजति यत्र विश्रमम्।"

इति तस्य सर्जने संहारे चेश्वरी। अत्र श्रुतिः "यथोर्णनाभः सृजते ग्रसते चेति। आज्ञावतारेऽप्युक्तम्

"स्वेच्छयैव जगत्सर्वं निगरत्युद्गिरत्यपि।"

इति पूजाकाले वक्ष्यमाणसंकेते क्रमपर्यायः प्रयत्नः

"प्रयत्नस्तदभिव्याप्तो व्यापारोऽतित्वरान्वितः।"

इति तन्त्रान्तरोक्तनीत्या श्रद्धावेष्टितया क्रमेण न्यस्तव्याः॥

तत्स्थानान्याह

पादाग्रजङ्घाजानूरुगुह्यलिङ्गनाभिकेषु च।
आधारे विन्यसेन्मूर्त्तिं तत्स्थामावाहनी न्यसेत्॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मूलेन व्यापकन्यासः कर्तव्यः परमेश्वरि ।
पादाग्रजङ्घानानूरु इति स्पष्टः । आधारे विन्यसेन्मूर्तिं पादादीनां बाह्यत्वेन प्रसिद्धत्वात् पृथक्करणमाधारमूर्त्योरान्तरत्वद्योतनार्थम् । आधारे पूर्वोक्ते चतुर्दले मूर्तिं मूर्तिविद्यां न्यसेत् स्मरेत । मध्यां मूर्तीवाहनीं न्यसेत् मूलेन व्यापकन्यासः कर्तव्यः परमेश्वरि मूलेन नवचक्रेश्वरीविद्यया सोभाग्यविद्ययेति यावत् । स्पष्टमन्यत् ॥

नवचक्रेश्वरीविद्यानां न्यासमुक्त्वा तदाधारनवचक्राणां चिन्तालक्षणमान्तरन्यासमाह

अकुलादिषु पूर्वोक्तस्थानेषु परिचिन्तयेत् ।
चक्रेश्वरीसमायुक्तं नवचक्रं पुरोदितम् ॥

अकुलादिषु "अकुले बिन्दुसंज्ञे च" इत्यत्र पूर्वोक्तस्थानेषु आदिपद्येनाज्ञौ वह्निप्राक्तनाभ्यनाहतविशुद्धलम्बिकाग्रभ्रुवोरान्तरेन्दवो गृह्यन्ते । पुरोदितं चक्रसंकेतोदितं नवचक्रं चक्रेश्वरीसमायुक्तं नवचक्रेश्वर्याधिष्ठितं परिचिन्तयेत् । अकुले सुषुम्नामूलभागसहस्रदलकमले त्रिपुराधिष्ठिते त्रैलोक्यमोहनं चक्रं, वह्नावाधारे चतुर्दलकमले त्रिपुरेश्वरीयुक्तं सर्वाशापरिपूरणं चक्रं, प्राक्तनाधिष्ठानस्थितषड्दलकमले त्रिपुरसुन्दर्याधिष्ठितं सर्वसंक्षोभकं चक्रं, नाभौ दशदलकमले त्रिपुरवासिन्याधिष्ठितं सर्वसौभाग्यदायकं चक्रं, अनाहते हृदि द्वादशकमले त्रिपुराश्रीसमधिष्ठितं सर्वार्थसाधकं चक्रं, विशुद्धे षोडशदलकमले त्रिपुरमालिन्यधिष्ठितं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सर्वरक्षाकरं चक्रं, लम्बिकाग्रे अष्टदलकमले त्रिपुरासि-
द्ध्यधिष्ठितं सर्वसिद्धिप्रदा रोगहरं चक्रं, भ्रुवोन्तरे द्विद-
लकमले त्रिपुराम्बिकाधिष्ठितं सर्वसिद्धिप्रदायकं च-
क्रं, इन्दौ ललाटे बिन्दौ महात्रिपुरसुन्दर्यधिष्ठितं
सर्वानन्दकरं चक्रं भावयेदित्यर्थः ॥

पूर्वोक्तविद्यानां नवचक्रेश्वरीणां न्यासमाह

तत्राद्या त्रिपुरा देवी द्वितीया त्रिपुरेश्वरी ।
तृतीया च तथा प्रोक्ता देवी त्रिपुरसुन्दरी ॥
चतुर्थी च महादेवि देवी त्रिपुरवासिनी ।
पञ्चमी त्रिपुराश्रीः स्यात् षष्ठी त्रिपुरमालिनी ॥
सप्तमी त्रिपुरासिद्धिरष्टमी त्रिपुराम्बिका ।
नवमी तु महादेवि महात्रिपुरसुन्दरी ॥

स्पष्टम् ॥

नन्वेताश्च विद्या नवचक्रेश्वर्यः पादादिषु कुलस्था-
नेषु रूपेण भावनारूपेण चक्रेण न्यस्तव्या एव, ने-
त्याह

पूजयेच्च क्रमादेता नवचक्रे पुरोदिते ।

एताः त्रिपुराद्या विद्या नवचक्रेश्वरीः पुरोदिते "त्रै-
लोक्यमोहनं चक्रमि"त्यादिना पूर्वोक्ते नवचक्रे इत्ये-
कवचनम् अन्योन्याविश्लेषकथनार्थं अकुलादिनव-
स्थानेषु अन्योन्यसंयुक्ततयैव भावितेषु नवचक्रेष्वि-
त्यर्थः क्रमात् पूजयेच्च त्रैलोक्यमोहनं चक्रमारभ्य
प्रतिचक्रमेकैकं पूजयेदित्यर्थः ॥

ननु किमासां नवधात्वं स्वाभाविकं नेत्याह

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवं नवप्रकारा या पूजाकाले तु पार्वति ।
एकाक्षरा त्र्यादिशक्तिरजरामृत्युकारिणी ॥

आद्या शिवादित्रित्यन्तस्य जगतो निदानत्वात् आद्यशक्तिः अद्यस्य सकलवर्णादिभूतस्य प्रकाशात्मनः परशिवस्य शक्तिः विमर्शिनी एकाकारा तेन निरन्तरसामरस्यमापन्ना परा पूजाकाले तु तथा नमवति । एवमुक्तप्रकारेण नवप्रकारा नवधाभिन्ना एवंविधपूजकस्याजरामरकारिणी [1]अजरामर उक्तलक्षणः शिवः नित्यमस्य कर्तृत्वे करोति । अत्रैव वक्ष्यति

"नव नित्योदिता पूजा त्रिभिर्भेदैर्व्यवस्थिता ।"

इति ॥

प्रासङ्गिकमुपसंहृत्य प्रकृतमेव प्रधानं मन्त्रसंकेतमनुहिशति

मन्त्रसंकेतकस्तस्या नानाकारो व्यवस्थितः ।
नानामन्त्रक्रमेणैव पारम्पर्येण लभ्यते ॥

तस्याः परमशिवसामरस्यरूपायाः पराया यो मन्त्रः सौभाग्यविद्यारूपः तस्य संकेतो गुह्यार्थप्रदर्शनं नानाकारोऽनन्तरवक्ष्यमाणषड्विधरूपः नानामन्त्रक्रमेणैव अनन्तरं पूर्वोक्तकरशुद्ध्यादिनानाप्रपञ्चपरिपाट्यैव पारम्पर्येण लभ्यते नान्यथा पारंपर्यविहीनानामसंप्रदायवतां चुम्बनवृत्त्या चोर्यगतान्नरमाठमात्रपर्यवसितानामनर्थायैव केवलमित्यर्थः।

अत्रैव वक्ष्यति

"पारंपर्यविहीना ये ज्ञानमात्रेण गर्विताः।

---

१ ख० पु० अजरामरेति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेषां समयलोपेन विकुर्वन्ति मरीचयः।"

इति ॥

उद्दिष्टस्य मन्त्रसंकेतस्य विभागं प्रतिजानीते

षड्विधं तं तु देवेशि कथयामि तवानघे।

षड्विधोऽन्तरवक्ष्यमाणभावार्थादिप्रकारेण षड्विधः अनघे परशिष्यत्वादिदोषरहिते ते तव मदंशरूपायाः विमर्शशक्तेः प्रकाशात्मकोऽहं कथयामि ॥

तद्विभागमाह

भावार्थः संप्रदायार्थो निगर्भार्थश्च[1] कौलिकः।

तथा सर्वरहस्यार्थो महातत्त्वार्थ एव च ॥

वक्ष्यमाणलक्षणत्वात् स्पष्टार्थः ॥

षोढादिन्यासक्रमेण लक्षणानि कथयिष्यन्नादौ भावार्थमाह

अक्षरार्थो हि भावार्थः केवलः परमेश्वरि।

न क्षरन्तीत्यक्षराणि नित्यपरशिववाचकत्वात्। किंच तान्वोष्ठव्यापारोऽभिव्यञ्जकस्तेषाम् अत एव अक्षराण्येवाक्षराणि तेषामर्थेऽभिधेयः श्रीसौभाग्यविद्यावयवपञ्चदशाक्षराणामर्थो भावार्थः ॥

अक्षरार्थमेवाह

योगिनीभिस्तथा वीरैर्वीरेन्द्रैः सर्वदा प्रिये।

शिवशक्तिसमायोगाज्जनितो मन्त्रराजकः ॥

योगिन्यः योगः शिवसंबन्धो नित्यं विद्यते आसां इति योगिन्यो विमर्शशक्त्यंशभूतेच्छाज्ञानक्रियात्मकभारतीपृथिवीरुद्राण्यः वीराः उक्ताः, तद्योगिनीनित्यसंबन्धभूताः प्रकाशांशभूता वामाज्येष्ठा-

---

१ क० पु० निर्गर्भार्थ इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रौद्र्यात्मक ब्रह्मविष्णुरुद्राः सृष्टिस्थितिसंहारकर्तारो वीरेन्द्राः सृष्टिस्थितिसंहारपदा अनाख्याकारिणः शान्ताम्बिकात्मानः शिवशक्तिरूपत्रयसमष्टिरूपाः त्रिबीजशिखरवर्त्तिकलात्रयाभिधेयाः, एतैः विद्याक्षराभिधेयमयैः मिथुनचतुष्टयैः शिवशक्तिसमायोगात् शिवशक्त्योः समायोगः संपर्कः तन्मिथुनीकृत्य मन्त्रराजकः सौभाग्यविद्यारूपः सकलमन्त्रोत्तमत्वात् जनितः काल आदिकर्मणि क्तः जातो भावितः इति यावत् तस्यार्थस्य नित्यत्वात् अयमेवार्थो मया सौभाग्यसुधोदये प्रपञ्चितः यथा

"सैव महाविद्यात्मा माता चतुरन्वयैकविश्रान्तिः ।
चतुराननादिजननी जाता चतुरात्मवर्गफलदात्री ॥
अक्षरविमर्शरूपौ स्वांशौ भित्त्वा चतुष्कलौ सैवम् ।
वामादीच्छादिमयान्यकरोद्द्वन्द्वान्यमूनि चत्वारि ॥
वामांशो ब्रह्मा स्यादिच्छैव तस्य भारती शक्तिः ।
अनयोरेतन्मिथुनं सृष्टिः प्राग्वाग्भवात्मकं बीजम् ॥
ज्येष्ठांशो विष्णुः स्यात् ज्ञाना विश्वंभरा तयोर्मिथुनम् ।
इदमेव दक्षिणान्वयरूपं श्रीकामराजमध्यास्ते ॥
रौद्र्यात्मकस्तु रुद्रः क्रियामयी शक्तिरस्य रुद्राणी ।
युगलमिदं तार्तीयं बीजं जनयति पश्चिमाम्नायः ॥
स्यादम्बिकास्वरूपः शंभुः शान्तात्मिकास्य शक्तिः स्यात् ।
मिथुनमिदं शिवशक्त्योरुत्तरसमयात्मत्रयमधितिष्ठेत् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवमनुरशक्त्योश्चतुरंशद्वन्द्वरूपिणी परा जाता ।
चतुरन्वयात्मिकेयं पश्यन्ती मातृकामयी विद्या ॥
सृष्टिः पूर्वाम्नायो वाग्भवबीजं तदात्मकं त्रिविधम् ।
सृष्टिस्थितिसंहारैर्भिन्ना सृष्टिस्त्रिमूर्त्तिः स्यात् ॥
ब्रह्मात्र सृष्टिसृष्टौ वधिपतिरेतस्य भारती शक्तिः ।
सोऽयं हस्यार्थः स्यात् स एव शिवशक्तिवाचकस्यापि ॥
सस्यार्थः स्यादत्र स्वशक्तिमयरूपसार्णसंयोगात् ।
सृष्टिस्थितौ तु विष्णुः कर्ता विश्वंभरास्य शक्तिः स्यात् ॥
विष्णुः कलिपेरर्थो ललिपेरेतत्स्वशक्तिरर्थः स्यात् ।
रुद्रोऽधिपतिः शक्ती रौद्रीः स्यात्तत्र सृष्टिसंहारे ॥
हरवर्णयुगलमनयोर्वाचकमर्थोऽत्र रस्य रुद्रः स्यात् ।
रुद्राक्षरसंपर्काद्रौद्री तच्छक्तिरत्र हस्यार्थः ॥
अत्र तु शक्त्यर्णस्य प्राथम्यं शक्तिबीजभूतत्वात् ।
अधिवसतः शिवशक्ती सर्गानाख्यां तयोः स्वमयी ॥
कामकलाकलयित्री तुर्यमयी रक्तशुक्लमिश्रतनुः ।
रक्तो बिन्दुः शुक्लः शंभुः परस्तदैक्यार्थम् ॥
एवं द्वितीयबीजं स्थितिरूपं दक्षिणान्वयात्म स्यात् ।
सृष्टिस्थित्यादिविभेदाद्वसन्ति ता एव देवतास्तत्र ॥
अत्र कलवर्णमध्यस्थितो हकारः स्थितिस्वरूपत्वम् ।
अस्य द्योतयति परध्वनिरूपः संविदम्बराकारः ॥
संहारात्मकपश्चिमसमये तद्वदेव तार्तीये ।
संहृतिसृष्ट्यादिवशात् ता एवात्रापि देवता न्यवसन् ॥
सृष्टौ शक्तौ नियतप्राधान्याच्चास्य शक्तिबीजत्वात् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सात्मा संहृतिसृष्टौ शिवमन्तर्भाव्य भासते शक्तिः ॥
त्रिमये तुरीयबीजेऽनाख्यारूपे चतुरन्वयात्मनि तौ ।
शक्तिशिवावधिवसतो निरन्तरं सामरस्यमापन्नौ ॥
सृष्ट्यादिभेदभिन्नश्रीविद्यावर्णयुगलनवकात्म ।
नवनादवर्गरूपा माता सा मध्यमाभिदा वितता ॥
शब्दस्पर्शौ रूपं रसगन्धौ चेति भूतसूक्ष्माणि ।
व्याप्यव्यापकभावात् पञ्चदश स्युः क्रमेण तत्संख्याः ॥
तिथयश्च कला नित्यास्तदात्मिकाः स्युस्तथैव तत्संख्याः ।
वर्णैः समष्टिरेषा विद्या व्याप्नोति तानि सर्वाणि ॥
सर्गादिस्थितिरूपः स्वांशैरणुभिस्तदात्मना विततः ।
सर्गेण कादिवर्णैरपि षट्त्रिंशद्भिरात्मनोऽवयवैः ॥
पुनरज्व्यञ्जनबिन्दुप्रभेदभिन्नांस्तदक्षरावयवान् ।
षट्त्रिंशत्संख्याकांस्तत्त्वमयान् अश्नुते सा माता ॥
व्यष्टिसमष्टिभेदैश्चतुरात्मा तत्त्वबीजपीठमयी ।
चतुरन्वयात्मनापि च माताष्टकमातृकामयी विद्या ॥"

इति ।

तुरीयमन्त्रस्यार्थमाह

तन्मयीं परमानन्दनन्दितां स्पन्दरूपिणीम् ।
निसर्गसुन्दरीं देवीं ज्ञात्वा स्वैरमुपासते ॥

तन्मयीं भारत्यादिब्रह्मादिचतुर्मिथुनवाचकबीजत्रयसमष्टिरूपवाच्यां परमानन्दनन्दितां परमशिवसामरस्यपरिस्फुरत्परमानन्दविभेदिनीं स्पन्दरूपिणीं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शिवादिक्षित्यन्तषट्त्रिंशात्तत्त्वस्पन्दरूपिणीं निसर्गसुन्दरीं सर्वप्राणिष्वात्मतया प्रेमास्पदीभूतां महात्रिपुरसुन्दरीं प्रकाशविमर्शसामरस्यरूपां परां ज्ञात्वा ज्ञानात्मतया त्वेरमुपासते त्वेच्छया विहरन्ति स्वैराचारं विहरन्तीत्यर्थः। अत्रैव वक्ष्यति

"स्वैराचारेण संभुज्य त्वहन्तेदयोः समा।"

इति।

मन्त्रपदार्थमाह

शिवशक्त्यात्मसंघट्टरूपे ब्रह्मणि भासते।
तत्प्रथाप्रसराश्लेषभुवि त्वेन्द्रोपलक्षिते॥
ज्ञातृज्ञानमयाकारकारणात्मत्वरूपिणीम्।

शिवशक्त्यात्मसंघट्टे शिवशक्त्यात्मनोः प्रकाशविमर्शयोः संघट्टः सामरस्यं तद्रूपे ब्रह्मणि बृहि वृद्धो इत्यस्माद्धातोः बृंहणत्वात् आत्मतत्त्वस्य "आत्मैव ब्रह्म" इति वैयाप्तिकतन्त्रोक्तरीत्या सर्वप्राणिषु आत्मभासते भूतभविष्यत्कालभासिनि तत्प्रथाप्रसराश्लेषभुवि तच्छब्देन प्रकाशात्मा परामृश्यते। तदुक्तं भगवद्गीतासु

"ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।"

इति शिवस्य प्रकाशस्य प्रथा विमर्शशक्तिः यथा दीपस्य तत्प्रथायाः प्रसरः षट्त्रिंशात्तत्त्वात्मना परिणामः तस्याश्लेषः शिवतावत्मात्रया पर्यवसानं तस्य भुवि विश्रामस्थाने। अत्र श्रुतिः "सर्वं खल्विदं ब्रह्म" इति "तज्जलानीति शान्त उपासेत" इति परमैश्वर्यवानिन्द्रः। अत्र श्रुतिः "इन्द्रो मायाभिः पुरु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रूपमीयते" इति तत्संबन्धि ऐन्द्रं कर्म तेनोपलक्षिते का-
क दन्तवत् देवदत्तगृहमितिवत् विश्वसर्जनादिव्यवहारः
अस्योपलक्षणं नतु स्वरूपधर्म इति यावत् प्रकाश-
विमर्शसामरस्यरूपे नित्ये विश्वसृष्टिसंहारकारिणि
तत्प्रकृत्यात्मकमहैश्वर्यपरामृष्ये[1] परमात्मनि विषये
ज्ञातुरादरनैरन्तर्यपाटवाभ्याससद्भाव तत्प्रकर्षलक्षणं
ज्ञानम् अवरतं तन्मयाकारणलक्षणत्राणात् म-
न्त्ररूपिणीम् । कोऽर्थः उक्तविशेषणपरप्रकाशविष-
यमननात् स्वसाधकं तन्मयताप्रतिपादनेन त्रायते
इति निरुक्त्या तुरीयलक्षणमहामन्त्ररूपिणीमित्यर्थः ॥

ननूक्तलक्षणविशेषिका तुरीयमन्त्ररूपिणी किं
लक्षणीयेत्यत आह

तेषां समष्टिरूपेण पराशक्तिस्तु मातृका ॥

तन्मयीमिति पूर्वोक्तमेव तेषां ब्रह्मादीनां भारत्या-
दीनां च सृष्ट्यादिसमष्टिरूपेण लक्षणेन लक्षिता प-
राशक्तिः । तुरवधारणे । पराशक्तिरेव

"न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च श्रूयते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविके ज्ञानबलक्रियाबले ॥"

इति श्रुतिप्रतिपादिता परैव मातृका अखिलमनाहत-
मूर्तिः मात्र्यु उत्तीर्णस्वरूपिणी भवति । "कायति नाना-
नामप्रपञ्चरूपेण मातृका देवी" इत्यस्मदुक्तरीत्या
मातृका पश्यन्तीमध्यमावैखरीरूपेण व्यापृता

१ ख० पु० परामृश्ये इतिपाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अत्र श्रुतिः

"चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥"

इति। कोऽर्थः—ब्रह्मादिसर्वविदुरसमष्टिरूपतात्तत्तत्पश्यन्तीमध्यमावैखरीविलासप्रकाशविमर्शसामरस्यरूपा तुरीयमन्त्रपदवाच्येत्युक्तम् ॥

तद्वर्णहृदयं मन्त्रे कुत्र निवसति नचेत् पतत्तन्मन्त्रस्य तद्वर्णहृदयवाच्यस्य कः भेदश्च इत्यत आह

मध्यबिन्दुविसर्गान्तः समास्यानमये परे।
कुटिलाहरूपिके तस्याः प्रतिरूपे विपत्कले ॥

तस्याः पराद्याः मध्यबिन्दुविसर्गान्तः समास्यानमये मध्यबिन्दुः ऊर्ध्वबिन्दुः अकारहकारसामरस्यरूपः कामाख्यः। तदुक्तं कामकलाविलासे

"बिन्दुरहंकारात्मा रविरेतस्मिन्समरसाकारः।
कामः कमनीयतयेति"

विसर्गश्च बिन्दुव्यासरूपं बिन्दुद्वयं नत्वकारः। उक्तं तत्रैव "कला च दहनेन्दुविग्रहौ बिन्दू" इति तयोरन्तः कामाख्यकलयोः द्वयोरपि मध्ये समास्यानमये निवासरूपे परे अक्षरे वर्णनामाद्यन्तत्वात्, अन्त्यापेक्षया अदेरकारस्य परत्वम्, आद्यपेक्षया न्यस्य कारस्य परत्वं, तेन परेऽक्षरे व्यापिनामाद्यन्ते अकारहकारहरूपे अक्षरे कथ्यते कुटिलरूपके कुटिले अकुलकुलकुण्डलिन्यौ कुटिलरूपत्वात् तत्त्वरूपे तयोः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रतिबिम्बरूपे वियत्कले वियच्छब्देन शून्यं लक्ष्यते तेन वियद्बिन्दुः कलाबिन्दुरर्धद्वयमात्रावती हकारलिपिः। कोऽर्थः—शिवशक्तिसामरस्यमयोर्ध्वबिन्दुवन्तर्गतो निवसति हकारः तस्य व्यासरूपकलात्तरावयवबिन्दुद्वयान्तर्गतमात्रारूपे निवसतो देहे आधाधारे सकुलकुलकुण्डलिनीरूपे परापररूपे तदवयवत्वात् तयोरपरापररूपयोः प्रतिबिम्बरूपे बिन्दुहकाराधारे अकारहकारयोः स्मरणमस्युचितत्वादित्यर्थः ॥

मन्त्रनिगमभूतकामकलाया अकारहकारयोः स्थितिमुक्त्वाद्य इदानीं मन्त्रे तद्वर्णद्वयस्थितिं क्रमेणाह

मध्यप्राणपथारूपस्पन्दव्योम्नि स्थिता पुनः।
मध्यमे मन्त्रपिण्डे तु ॥

मध्यमे मन्त्रपिण्डे वाग्भवशक्तिबीजयोर्मध्यगते कामराजाख्ये षडक्षरपिण्डे मध्यप्राणप्रथारूपस्पन्दव्योम्नि स्थितो मध्यप्राणः कामकलाधोगतबिन्दुद्वयमध्यगतप्राणो हकारः तस्य प्रथा पृथुत्वेन प्रतीतिः श्रुतिगोचरत्वात् तद्रूपं स्पन्दव्योम हकारः तस्मिन् व्योम्नि पुनः स्थिता हकारस्य विमर्शशक्तिस्फूर्तिमयत्वात् ॥

तृतीयपिण्डके पुनः।
राहुकूटद्वयस्फूर्जत् ॥

तृतीयपिण्डके शक्तिबीजे चतुरक्षरपिण्डे पुनश्चार्धे द्वितीयबीजवत् स्फुटीभावेन स्फुरति। किन्तु राहुकूटद्वयस्फूर्जत् राहुकूटं षोडशसहानां वर्णानां वर्गः, तथा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

च पञ्चकूटं षट्कूटमिति राहुकूटे द्वयो वर्णः द्वितीयादन्यः तृतीयः सकारः तद्वर्गतृतीयवर्णत्वात् बोद्धा न्यासे घोषसंज्ञो राहुवर्गः। अत्रैव वक्ष्यति

"वक्त्रेषणादिचतुर्वर्णैः संहितं राहुमेव च।"

इति पुनः राहुकूटद्वयस्फूर्जेदिति राहुकूटे तृतीयसकारोपरि अविभागेन स्फूर्जत्प्रकाशमानं सकलवर्णाद्यमनुत्तरादयम्। तदुक्तं संकेतपद्धत्याम्

"अकारः सर्ववर्णाद्यः प्रकाशः परमः शिवः।"

इति परावयवभूताकारहकारावेव कामकलोर्ध्वबिन्दौ मात्रायां चेति स्थित्वा पुनःस्थूलभावमासाद्य पृथग्भूतौ कामराजबीजान्तर्गतककारलकारमध्यगतहकारे पूर्वबीजादिगतसकारे गता सकारेच निवसत इत्यर्थः॥

ननु मध्यपिण्डे तृतीयपिण्डे च परावयवभूतयोरवस्थानमुक्तं प्रथमबीजे किमिति नोक्तम् उच्यते, दक्षिणस्रोतःपक्षपातिन्याः सौभाग्यदेवताया: पराया: परापरप्रकाशप्रधानत्वात् स्थितेश्च परापरप्रकाशन्वितत्वात् मध्यबीजस्य च स्थितिरूपत्वात् तत्र विमर्शप्रकाशयोरवस्थानमुक्तम् शिवस्य संहाररूपत्वात्, पूर्वबीजस्य च संहारात्मकत्वात्, प्रकाशस्य च तत्रावस्थानमुक्तं विशेषेण, सामान्यतस्तु वाग्भवे अत एव तदक्षरद्वयसंभवात् तद्विश्वमयत्वं पराया: कथितमित्याह

चलत्ता संस्थितस्य तु।
धर्माधर्मस्य वाच्यस्य विद्यामृतमयस्य च॥
वाचकाक्षरसंयुक्तैः कथिता विश्वरूपिणी॥

---

१ ख० पु० भूतयोरवस्थानमिति पाठः।
२ ख० पु० प्रकाशेरवस्थानमिति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चलतो भावः चलत्ता अस्यां संस्थितस्य। चलत्त्वं नाम अत्र नश्वरत्वम्। अत्रावशिष्टक्रियाविद्याचक्रतत्त्वादिसकलप्रपञ्चस्थितस्य धर्माधर्मस्य पूर्वोक्तधर्माधर्मनिर्वचनधर्माधर्मपदवाच्यशिवशक्तिद्वयस्य विषामृतमयस्य विषं संसारो मोहहेतुत्वात्, अमृतं मृतं मरणं तद्रहितत्वात् मुक्तिः। अत्र श्रुतिः "तमेवं विद्वानमृत इह भवतीति" तन्मयस्य तदुभयहेतुत्वात् तयोर्वाच्यस्याभिधेयस्य वाचकाक्षरसंयुक्तेः तदुभयात्मकशिवशक्तिमयवाच्यवाचकाकारहकारसंयोगा विश्वरूपिणी विद्या चक्रतत्त्वादिमयरूपिणी ॥

अत एव

तेषां समष्टिरूपेण परां शक्तिं तु मातृकाम् ।

तेषां सर्वेषां समष्टिरूपेण त्रित्रिमयेन सर्वेण परां विश्वोत्तीर्णस्य परशिवस्य मातृकामुक्तनिर्वचनाम् ॥

कूटत्रयात्मिकां देवीं समष्टिव्यष्टिरूपिणीम् ।

वाग्भवकामराजशक्तिबीजात्मिकां देवीं प्रकाशविमर्शसामरस्यरूपाम् अत एव समष्टिव्यष्टिरूपिणीं कूटत्रयात्मना व्यष्टिरूपिणीम् ॥

आद्यां शक्तिं भावयन्तो भावार्थ इति मन्वते

आद्यां शक्तिं सकलजगदादिभूततया इति पूर्वोक्तक्रमेण भावयन्तो योगिनो भावार्थं मन्वते ॥

भावार्थमुक्त्वा इदानीं संप्रदायार्थमाह

संप्रदायो महाबोधरूपो गुरुमुखे स्थितः ।
विश्वाकारप्रथायास्तु महत्त्वं च यदाश्रयम् ॥

सम्यक् याथार्थ्येन कर्णे शिष्यस्य प्रदीयते इति संप्रदा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यो महाबोधरूपः महतो देशकालाकारैरनवच्छिन्नप्रकाशस्य बोधरूपः परिज्ञानं रूपमस्य गुरुमुखे स्थितः

"गृणते तत्त्वमात्मीयमात्मीकृतजगत्त्रयम्।
उपाधोपेयरूपाय शिवाय गुरवे नमः॥"

इत्यभियुक्तवचनोक्तरीत्यात्मपरमात्मप्रकटनपरो गुरुः तस्यैव मुखे स्थितः। अत्र प्रमाणवचनम्

"सर्वज्ञो हि शिवो वेत्ति सदसच्चेष्टितं नृणाम्।
तेनासौ नानुगृह्णाति किंचिज्ज्ञस्य गुरोर्गिरा॥"

इति अत्र गुरोरिति गुरुमानिनः किंचिज्ज्ञस्य गुरुत्वाभावात् विश्वं शिवादिक्षित्यन्तं षट्त्रिंशत्तत्त्वात्मकं तदाकारप्रथा चिच्छक्तिः। अत्र श्रुतिः "सिसृक्षतो लोकानिति" सिसृक्षेति तस्या महत्त्वं तदाकारत्वं तदाश्रयत्वं। कोऽर्थः—परमशिवसामरस्यरूपायाः पराघाः बीजत्रयरूपेण परिणतायाः विश्वमयतावासना गुरुमुखेनैव लभ्यते इत्यर्थः॥

"विश्वाकारप्रथायास्तु महत्त्वं च यदाश्रयम्" इत्यस्यैव अर्थं विदुषां वक्तव्यार्थस्य महत्त्वात् अत्यन्तसावधानतया श्रोतव्यमित्याह

शिवशक्त्याद्यया मूलविद्यया परमेश्वरि।
जगत् कृत्स्नं यथा व्याप्तं शृणु सावहिता प्रिये॥

शिवोऽकारः शक्तिर्हकारः तावाद्यौ हेतुभूतौ यस्याः सा तथाविधया पूर्वोक्तरीत्या प्रथमया मूलविद्यया कृत्स्नं जगदेवंभूतं तया व्याप्तमुक्तप्रकारेणेति अत एव तां सावहितात्यन्तसावधाना शृणु॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विद्यायां व्याप्तत्वमेव प्रतिजानीते

पञ्चभूतमयं विश्वं तन्मयी सा सनातनी ।
तन्मयी मूलविद्या च तथा च कथयामि ते ॥

पञ्चभूतमयं विश्वं भूतानि पृथिव्यग्नेर्नो वाच्याकाशाः, विश्वमुक्तलक्षणं सा परा देवता तन्मयी पञ्चभूतात्मिका मूलविद्यापि तन्मयी तद्वाचिका देवतावाचिका पञ्चभूतवाचिका, अत एव तदुभयमयी तत्प्रकारं कथयामीत्यर्थः । "तस्माद्वा एतस्मादाकाशाः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी" इत्युपनिषदुक्तरीत्या प्रकाशात्मकात् परमशिवात् पञ्चभूतानामुत्पत्तिरिति हि स्थितिः ॥

एवं स्थितेऽस्याः किं वाच्यं किं वाचकमिति प्रष्टुं परिहरन् वर्णभूतसृष्टिप्रतिपादनपुरःसरं विद्योमयतामेवाह

हकाराद्व्योम संभूतं ककारात्तु प्रभंजनः ।
रेफादग्निः सकाराच्च जलतत्त्वस्य संभवः ॥
लकारात् पृथिवी जाता तस्माद्विश्वमयी च सा ॥

हकारात् व्योम संभूतं प्रथमं विमर्शोपाधेः आकाशवाचको हकारो जातः, तदनन्तरं तद्वाच्यं व्योम प्रकाशात्मनः परमशिवात् संभूतं । पश्चाद्वायुवाचकः ककारो जातः । ककारानन्तरं ककारवाच्यः प्रभञ्जनो जातः । पश्चादग्निवाचको रेफः संजातः । तदनन्तरं रेफवाच्योऽग्निः संभूतः । पुनर्जलतत्त्ववाचकः सकारः संजातः । सकाराज्जलतत्त्वं संभूतं, तदनन्तरं पृथिवीवाचको लकारो जातः, लकारात् पृथ्वी जातेत्यर्थः । यस्मात् शिवशक्तिसामरस्यहूपपरावयवहूपप्रका-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शविमर्शाभ्यां पञ्चभूतानि तदक्षराणि च जातानि तस्मा-
दुभयसामरस्यरूपा परा स्वावयवभूतभूतवर्णमयविश्व-
मयीत्यर्थः। तदुक्तं कामकलाविलासे

"स्फुरितादरुणाद्बिन्दोर्नादब्रह्माह्वयो रवो व्यक्तः।
तस्माद्गगनसमीरणदहनोदकभूमिवर्णसंभूतिः॥
अथ विशदादपि बिन्दोर्गगनानिलभूमिवह्निवारिजनिः।
एतत्पञ्चकविकृतिर्जगदिदमण्वाद्यजाण्डपर्यन्तम्॥
माता मानं मेयं बिन्दुत्रयभिन्नबीजरूपाणि।
धामत्रयपीठत्रयभेदभावितान्यपि च॥
तेषु क्रमेण लिङ्गत्रितयं तद्वच्च मातृकात्रितयम्।
इत्थं त्रिमयतुरीये बीजे पीठादिभेदिनी विद्या॥"

इति॥

नन्वेवंविधक्रमेण विद्याया वर्णाः किमिति न स्थिताः
उच्यते, सत्यमेवंविधक्रमो भवति तथापि पूर्वोक्तसृ-
ष्टिस्थितिसंहाराख्यावभासनार्थं विद्यायामक्रमेण
वर्णाः पठ्यन्ते, तेन भूतवर्णक्रमो वासनाक्रमं बा-
धितुं नोत्सहते वासनार्थत्वाद्वर्णानाम्। ननु तर्हि भूतसंख्य-
यैवाक्षराणि किमिति न संभवन्ति अन्यान्यपि बहूनि श्रू-
यन्ते इत्याह

गुणाः पञ्चदशाख्याता भूतानां तन्मयी शिवा॥

भूतानां पञ्चानां व्याप्यव्यापकभावेन पञ्चदश गुणाः
स्युः अतस्तन्मयी तदात्मिका तत्संख्यावद्वर्णवतीयं
विद्या शिवा शोकमोहमयसंसाररूपा मङ्गलपरिपन्थि-
परमाद्वैतप्रथारूपा परममङ्गलार्थत्वात्॥

ननु विद्याक्षरसंख्याया यावन्तः परिगणिताः
किं तन्मयतावासनावक्तुं शक्यते इत्याह

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यस्य यस्य पदार्थस्य या या शक्तिरुदीरिता ।
सा सा सर्वेश्वरी देवी स स सर्वो महेश्वरः ॥

लोके यस्य यस्य पदार्थस्य या या शक्तिः किंचित्करणसामर्थ्यलक्षण विद्यते सा सा शक्तिः सर्वेश्वरी देवी सर्वस्य शिवादिक्षित्यन्तस्य इयमेवेश्वरी नियामिका देवी परा स स सर्वः पदार्थो महेश्वरः विश्वजगन्नियामकः परमशिवः सर्वलोके यद्वस्तु यत् किंचित्करणसामर्थ्यरूपेण परैव परिणता तत्सामर्थ्यवद्वस्तुरूपेण परमशिवः परिणते इति वक्तुं शक्यते, किंवक्तव्यं तदुभयमयविद्यावर्णसमानसंख्यावत्यदार्थरूपेण तावेव परिणतावित्यर्थः । तदुक्तमभियुक्तैः

"त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचित्वं
त्वं चेतनासि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुतासि सलिले क्षितिविनि त्वमूष्मा
निःसारमेव निखिलं त्वदृते यदि स्यात् ॥"

इति ॥

ननु भूतगुणमयी शिवेत्युक्तं शिवाद्यास्तत्संख्याकुत इत्याह

व्याप्तौ पञ्चदशार्णैः सा विद्या भूतगुणात्मिका ।
पञ्चभिश्च तथा षड्भिश्चतुर्भिरपि चाक्षरैः ॥

सा शिवा परैव शक्तिका वाच्यवाचकयोरभेदिनी पञ्चभिरक्षरैः वाग्भवबीजस्यावयवैः, षड्भिरक्षरैः कामराजस्यावयवैः चतुर्भिरक्षरैः शक्तिबीजस्यावयवैः नक्षरन्तीत्यक्षराणि तेषां नित्यत्वात् । एवं विद्यास्वांशैः नाशरहितपञ्चदशार्णैः व्याप्ता कृत एव भूतात्मिका बीजत्रयमक्षरशो विभज्य भूतगुणात्मकतावासनामुक्त्वा इदानीमक्षराण्यवयवशो विभज्य षट्त्रिंशत्तत्त्वात्मक-

वासना माह

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्वरव्यञ्जनभेदेन सप्तत्रिंशात्त्रभेदिनी ।
सप्तत्रिंशात्त्रभेदेन षट्त्रिंशत्तत्त्वरूपिणी ॥
तत्त्वातीतस्वभावा च विद्येषा भाव्यते सदा ॥

स्वरव्यञ्जनभेदेन प्रथमबीजे ऽकारचतुष्टयम् ईकारश्चेति पञ्च स्वराः शिष्टानि व्यञ्जनानि षट् एवमेकादश; द्वितीयबीजे त्रकारपञ्चकमीकारश्चेति षट् स्वराः शिष्टानि व्यञ्जनानि सप्तैवेति त्रयोदश; तृतीयबीजे सकारत्रयम् ईकारश्चेति चत्वारः स्वराः शिष्टानि व्यञ्जनानि पञ्च; एवं नवेत्येवंविभागे त्रयस्त्रिंशात् बीजत्रयान्ते बिन्दवस्त्रय इति षट्त्रिंशात्; एतत्समष्टिरेका । एवं सप्तत्रिंशात्त्रभेदिनी विद्या समष्टिरूपा । एवं सप्तत्रिंशात्त्रभेदेन षट्त्रिंशत्तत्त्वरूपिणी तत्त्वातीतस्वभावा च विद्येषा व्यष्टिसमष्टिभेदेन षट्त्रिंशत्तत्त्वात्मिका तदतीतेयं षट्त्रिंशत्तत्त्वानि स्वयंवभूतानि तैः रूपवती सप्तत्रिंशात्त्रभेदेन तत्त्वातीतस्वभावा च स्वस्य भावः स्वभावः शिवस्य यादृशो भावः तादृशः स्वभावं इति भावयितव्यमित्यर्थः ॥ तत्त्वानां लक्षणानि मयैव सौभाग्य सुधोदये निरूपितानि यथा

"यदग्रमनुत्तरमूर्तिर्निजेच्छया निखिलमपि जगत् सृष्टुम् ।
पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः ॥ १॥
इच्छा सैव स्वच्छा संततसमवायिनी सती शक्तिः ।
सचराचरस्य जगतो बीजं निखिलस्य निजनिलीनस्य ॥ २॥
सेच्छाधात्युन्मीर्णं जगदात्मतया समाच्छाद्य ।
निवसन् स एव निखिलानुग्रहनिरतः सदाशिवोऽभिहितः॥
विश्वं पश्यात् पश्यन्निदन्तया निखिलमीश्वरो जातः ।
सा भवति शुद्धविद्या भेदस्ताहन्तयोरभेदमतिः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

माया विभेदबुद्धिर्निजांघ्रिजातेषु निखिलजीवेषु ।
नित्यं तस्य निरङ्कुशविभवं वेलेव वारिधेरुन्द्रे ॥ ५ ॥
स तया परिमितमूर्तिः संकुचितसमस्तशक्तिरेष पुमान् ।
रविरिव संध्यारक्तः संवृतशक्तिः स्वभासनेऽप्यपटुः ॥ ६ ॥
संपूर्णकर्तृताद्या ब्रह्मः सत्यस्य शक्तयस्तस्य ।
संकोचात् संकुचिताः कलारूपेण रूढयन्त्येव हि ॥ ७ ॥
तत् सर्वकर्तृता सा संकुचिता कतिपयार्थमात्रधरा ।
किंचित्कर्तारमिमुं कलयन्ती कीर्त्यते कला नाम ॥ ८ ॥
सर्वज्ञतास्य शक्तिः परिमितनतुरल्पवेद्यमात्रधरा ।
ज्ञानमुत्पादयन्ती विद्येति निगद्यते बुधैराद्यैः ॥ ९ ॥
नित्यपरिपूर्णतृप्तिः शक्तिस्तस्यैव परिमिता तु सती ।
भोगेषु रञ्जयन्ती सततममुं रागतत्त्वतां याता ॥ १० ॥
सा नित्यतास्य शक्तिर्निकृष्य निधनोदयप्रदानेन ।
नियतपरिच्छेदकरी कृत्ता स्यात् कालतत्त्वरूपेण ॥ ११ ॥
व्यास्य स्वतन्त्रताख्या शक्तिः संकोचशालिनी हेव ।
कृत्याकृत्येष्वेवमुं नियतममुं नियमयन्त्यभिनियतिः ॥ १२ ॥
इच्छादित्रिसमष्टिः शक्तिः पूर्णास्य संकुचद्रूपा ।
संकलितेच्छाद्यात्मक सत्त्वादिसाम्यरूपिणी तु सती ॥ १३ ॥
बुद्ध्यादिसामरस्य स्वरूपचिन्मात्रिका मता प्रकृतिः ।
इच्छास्य रजोरूपाहंकृतिरासीदहं-प्रतीतिकरी ॥ १४ ॥
ज्ञानापि सत्त्वरूपा निर्णयबोधस्य कारणं बुद्धिः ।
तस्य क्रिया तमोमयमूर्तिर्मन उच्यते विकल्पकरी ॥ १५ ॥
वामादिपञ्चभेदैः स एव संकुचितविग्रहो देवः ।
ज्ञानक्रियोपरागप्राधान्याद्विविधविषयरूपोऽभूत् ॥ १६ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रोत्रं चक्षुः स्पर्शनजिह्वाघ्राणानि बोधकरणानि ।
शब्दस्पर्शौ रूपं रसगन्धौ चेति भूतसूक्ष्माणि ॥ १७ ॥
अथमेवातिनिकृष्टो ज्ञानो भूतात्मनापि भूतेशः ।
गगनमनिलश्च तेजः सलिलं भूमिश्च पञ्चभूतानि ॥ १८ ॥
श्रोत्रादिकरणवेद्याः शब्दाद्यास्तानि वेदकान्येषाम् ।
वचनकरी वागासीत्पाणिः स्यात्करणभूत आदाने ॥ १९ ॥
गमनविसर्गानन्दचितये पादादिकं करणम् ।
गन्धवती भूमिः स्यादापः सांसिद्धिकद्रवास्तेजः ॥ २० ॥
उष्णस्पर्शोरूपस्पर्शो वायुरम्बरं सशब्दम् ॥ "

इति ॥

पुनरपि सिंहावलोकितन्यायेन भूतगुणानां पञ्चदशानां विद्यायाश्च तन्मध्ये विवृणोति

पृथिव्यादिषु भूतेषु व्यापकं चोत्तरोत्तरम् ॥
भूतं तदधस्तनं व्याप्यं ॥

पृथिव्यादिषु आदिशब्दात्तेजोवाय्वाकाशा गृह्यन्ते । पृथिव्यादिषु भूतेषु उत्तरं भूतं व्यापकं अधिकवृत्ति अधस्तनं भूतं व्याप्यं न्यूनवृत्ति । कोऽर्थः—आकाशं स्वाधस्तनानां भूतानां व्यापक आधकवृत्तित्वात् । अन्यान्यपि चत्वारि भूतानि व्याप्यानि न्यूनवृत्तित्वात् । एवं वायुरग्न्यादीनां त्रयाणां व्यापकः त्रीणि व्याप्यानि । एवं तेजोऽपि अधस्तनयोः व्यापकं ते व्याप्ये । एवमापः पृथिव्याः व्यापकाः पृथिवी व्याप्येत्यर्थः ॥

ते तु व्यापकगुणा व्याप्येष्ववस्थिता इत्याह

तद्गुणा व्यापकाश्रयाः ।
व्याप्येष्ववस्थिताः देवि स्थूलसूक्ष्मविभेदतः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

व्यापकाश्रयाः तद्गुणा व्याप्येष्ववस्थिताः। सूक्ष्मविभेदतः स्थूलमधिकवृत्ति व्यापकं, सूक्ष्ममल्पवृत्ति व्याप्यं। व्यापकव्याप्ययोः स्थूलसूक्ष्मविभेदात् व्यापकगुणाः व्याप्येषु तिष्ठन्तीत्यर्थः। ननु कस्य कस्य भूतस्य गुणाः केषु केषु भूतेषु स्थिताः, विद्यायां कानि कान्यक्षराणि कस्य कस्य भूतस्य गुणान् लक्षयन्तीत्यत आह

तस्माद्व्योमगुणः शब्दो वाय्वादीन् व्याप्य संस्थितः।
व्योमबीजैस्तु विद्यास्थैर्लक्षयेच्छब्दपञ्चकम्॥

तस्मात् व्योम्नः स्वेतरभूतेभ्यः स्थूलत्वात् व्यापकत्वं तेन तद्गुणः शब्दो वाय्वादीन् वायुतेजःसलिलपृथिव्यात्मकानि व्याप्य स्थितः। विद्यास्थैः व्योमबीजैः पञ्चभिः पञ्चभूतेषु स्थितानां शब्दानां पञ्चकं लक्षयेत्। व्योमबीजत्वात् हकारपञ्चकं तद्गुणं शब्दपञ्चकं लक्षयन्तीत्यर्थः॥

ननु विद्यायां षट् हकाराणि वसन्ति अन्यस्य हकारस्य किं प्रयोजनमित्यत आह

तेषां कारणरूपेण स्थितं ध्वनिमयं परम्।

तेषां शब्दानां कारणरूपेण स्थितो ध्वनिर्नादः शब्दानां कारणं। तदुक्तमभियुक्तैः

"पिण्डे वाचकविस्तरस्य महतः संसारदोषस्थिति-
र्नादोऽसौ तव देवि मूर्ध्नि समनामीमानमुल्लङ्घयन्।
घण्टाक्वाण इव क्रमेण विरमन्नन्त्यामणीयस्तराम्
आजिघ्रन् परचिद्दशामनुभवन्मूर्त्तिं पुनीयान्मम॥"

इति। तन्मयं तल्लक्ष्यत्वात् परं कामराजबीजस्थितककारलकारमध्यगतहकाराक्षरम्। कोऽर्थः—काम-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

राजमध्यस्थितः षष्ठो हकारः आकाशादिपञ्चभूतसूक्ष्म-गतशब्दपञ्चककारणनादरूपः कामराजबीजस्थितिरूपनां लक्षयतीत्यर्थः ॥

ननु हकारादिवर्णा आकाशादिभूतवाचका इत्युक्तं कथं शब्दादिपञ्चभूतगुणानामपि वाचका इत्युच्यते इत्यत आह

भवेद्गुणवतां बीजं गुणानामपि वाचकम् ।

गुणवतां गुणाः शब्दादयः पञ्च तद्वतामाकाशादीनां भूतानां बीजं जातावेकवचनम् । अत्र विद्यायां हकारादीनां पञ्चभूताक्षराक्षराणि व्यञ्जनानि अत्रैवोक्तं "हकाराद्व्योम संभूतम्" इत्यादि अतो बीजानीत्युच्यन्ते ककारादिक्षकारान्तानां व्यञ्जनानां बीजत्वमुक्तम् । तदुक्तं चिद्गगनचन्द्रिकायाम्

"बिन्दुसर्गसहितमृतेः कला
बिन्दुसर्गरहिताश्च ये शुचेः ।
सर्व एव शशिनः कलाश्च ये
योनयो विधृतबीजतत्पराः ॥"

इति । परापञ्चाशिकायामप्युक्तम् ।

"द्विधेयं मातृका देवी बीजयोन्यात्मना स्थिता ।"

इति तानि तद्गुणानां शब्दादीनां वाचकानि लक्षणानि हकाराद्यक्षराणि आकाशाद्यर्थेषु संकेतितत्वात् तद्गुणेषु शब्दादिषु लक्षणान्येव । तदुक्तमभियुक्तैः

"साक्षात्संकेतितं ह्यर्थमभिधत्ते स वाचकः ।"

इति । कोऽर्थः — शब्दादिगुणवतामाकाशादिभूतानां यानि बीजानि वाचकानि हकारादीनि तानि तद्गुणानां

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शब्दादीनां लक्षकानीत्युक्तम् ॥

लक्षणीयं निमित्तमाह

कार्यकारणभावेन तयोरैक्यविवक्षया ।

तयोः गुणगुणिनोः गुणी कार्यं गुणः कारणम् अतः कार्यकारणभावेन एकत्वविवक्षया विवक्षितमेकत्वं ननु तात्त्विकं गुणगुणिनोः कार्यकारणभावात् एकत्वमारोप्य तत्संबन्धिनं निमित्तीकृत्य लक्षणया गुणिशब्दा गुणेषु योज्यन्ते इत्यर्थः । तदुक्तं स्वच्छन्दसंग्रहे

"शाकः शान्तत्वघोरत्वविशेषापन्नरूपतः ।
शब्दस्तु शब्दतन्मात्रमृडत्वकठिनत्वतः ॥
विशिष्टस्पर्शरूपश्च स्पर्शतन्मात्रसंज्ञकः ॥
नीलपीतत्वशुक्लत्वविशिष्टरूपमेव च ॥
रूपतन्मात्रमित्युक्तं मधुराम्ल्वादिसंयुतम् ।
रसतन्मात्रसंज्ञस्तु सौरभ्यादिविशेषतः ॥
गन्धः स्याद्गन्धतन्मात्रं तेभ्यो वै भूतपञ्चकम् ।
आकाशाच्छब्दतन्मात्रान्नित्यं शब्दगुणं महत् ॥
व्यापकं निर्मलं तत्त्वमवकाशप्रदानकम् ।
स्पर्शतन्मात्रतो वायुश्चलद्रूपोऽभवन्नभः ॥
जगत्प्राणोऽनिलो व्यूहप्रेरणं च लघुर्भवेत् ।
शब्दस्पर्शगुणः प्रोक्तो गमागमनकर्मकृत् ॥
शब्दस्पर्शरूपगुणं तेजस्तत्त्वं च भास्वरम् ॥
रूपतन्मात्रकारं च पाककर्मकरं शिवे ।
रसतन्मात्रतो वारितत्त्वं द्रवात्मकम् ॥
शब्दस्पर्शरूपरसगुणसंग्रहकर्मकृत् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गन्धतन्मात्रतो जातं पृथ्वी तु कठिना मला ।
शब्दस्पर्शरूपरसगन्धपञ्चगुणात्मकम् ॥
पृथिवीतत्त्वमाख्यातं कठिनं सर्वधारणम् ।
पृथ्व्यादिव्योमतत्त्वान्तं पञ्चकं पूर्वपूर्वकम् ॥
कार्यं वृद्ध्या समावृत्य वर्तते पञ्चकं क्रमात् ।"

इति ॥

पूर्वं विद्यास्थहकारपञ्चकस्य पञ्चभूतस्थितशब्दपञ्चकलक्ष्यतामुक्त्वा इदानीं वाय्वादिभूतचतुष्टयस्थितं स्पर्शचतुष्टयं वायुवाचकैरक्षरैः तद्गुणं स्पर्शचतुष्टयं लक्षयति ।

महामायात्रयेणापि कारणेन च बिन्दुना ।
वाय्वग्निजलभूमीनां स्पर्शानां च चतुष्टयम् ॥
उत्पन्नं भावयेद्देवि स्थूलसूक्ष्मविभेदतः ।

महामाया ईकारः तेषां त्रयं बीजशिखरवर्तिनामीकाराणां बिन्दुद्वयहार्धमात्रामयानां त्रयं कारणेन च बिन्दुना तदक्षरस्थकारणेन अकारहकारसामरस्यरूपेण कामाख्येन ऊर्ध्वबिन्दुना वाय्वग्निजलभूमीनां स्पर्शानां च चतुष्टयमुत्पन्नं लक्ष्यं भावयेत् स्थूलसूक्ष्मविभेदत इति सूक्ष्माणि पृथिव्यप्तेजांसि स्थूलो वायुरर्वाचीनेभ्यः अत एवंविधेन ईकारत्रयेण बिन्दवः षट् सन्ति कारणं बिन्दुः समष्टिः वृत्तं हि षड्बिन्दुलाञ्छितं वृत्तात्मकत्वात् वायुमण्डलस्य । तदुक्तमभियुक्तैः

"कण्ठादितालवन्तघृतं वृत्तं षड्बिन्दुलाञ्छितम् ।
धूम्रमिति ॥"

इति तद्वायुमण्डलवाचकेन ईकारत्रयेण समष्टिबिन्दुना च

क० पु० स्थितिमिति पाठः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्थूलसूक्ष्मविभेदतः वायुरभूत सूक्ष्मत्वभेदतः वाय्वादिचतुष्टयस्थितं स्पर्शचतुष्टयं भावयेदित्यर्थः ॥

वायुवाचकैः वायुगुणं स्पर्शचतुष्टयं लक्षयित्वा इदानीं तेजोवाचकैरक्षरैः तद्गुणं रूपत्रयं लक्षयति

रूपाणां त्रितयं तद्वत त्रिभीरेफैर्विभावितम् ।

रूपाणां त्रितयं वह्निवारिभूमिस्थानां रूपाणां त्रितयं त्रिभीरेफैर्विभावितं लक्षितम् ।

ननु रूपं पृथिव्यग्नेजसां साधारणं कथं तेजोबीजेन रेफेण लक्षितमित्याह

प्रधानं तेजसो रूपं तद्बीजेन हि जन्यते ।

ननु त्रिष्वपि भूतेषु विद्यते रूपं तथापि वाय्वाकाशयोरभावात् प्रथमं तेजसो रूपं प्रधानं पश्चादितरयोर्भूतयोः तस्य बीजेन रेफेण जन्यते प्रकाश्यते । जननं प्रादुर्भावः ॥

पूर्वं तेजोवाचकैरक्षरैः तद्गुणं रसद्वयं लक्षयति

विद्यास्थैश्चन्द्रबीजैस्तु स्थूलः सूक्ष्मो रसः स्मृतः ।

विद्यास्थैः त्रिबीजैः स्थितैः चन्द्रबीजैः सकारैरभिधानमात्रमेतत् । तदुक्तमभियुक्तैः "व्योमेन्दुवह्न्यरविन्दुभिरेकमन्यत्" इति स्थूलः सूक्ष्मः स्थूलरसोऽन्नत्वगतो व्यापकत्वात् सूक्ष्मो रसो भूतत्वगतो व्याप्यत्वात् स्मृतो भावितः । स्मृतिर्हि भावना ॥

ननु विद्यायामपि सकारद्वयमस्ति अप्पृथिव्योस्तु रसद्वयमेव इतरेण सकारेण किमुच्यते इत्याह

संबन्धो विद्यते लोके रसस्याप्यमृतस्य च ।

अमृतस्य सुधाया रसस्यापि संबन्धो लोके विदितः । सुरासुरैः अर्णवनिधौ मथ्यमाने तत्सारभूतममृतमुदितम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति पुराणप्रसिद्धा लोके परिज्ञातत्वं यतोऽमृतस्य सारभूतत्वात् गुणे रसः तृतीयसकारेण लक्ष्यते । कोऽर्थः- अप्रत्वं स्थूलममृतं तत्सारभूतं सूक्ष्मं तद्व्याप्यं पृथिवीच सूक्ष्मा तेन सलिलामृतपृथिव्यन्तरस्थितो रसः विद्यास्थैः त्रिभिः सकारैर्लक्ष्यते इत्यर्थः ॥

पूर्वमब्वाचकैरक्षरैः अबगुणं रसत्रयं लक्षयित्वा इदानीं पृथिवीवाचकैर्वर्णैः पृथिवीगुणं गन्धं लक्षयति

वसुंधरागुणे गन्धस्तल्लिपिर्गन्धवाचिका ।

वसुन्धरायाः पृथिव्याः गुणे गन्धः तल्लिपिः पृथिवीवाचकवर्णे गन्धवाचकः ॥

ननु विद्यायां लकारत्रयमस्ति तत्रैकेन लकारेण पृथिवीगुणे गन्धो लक्ष्यतेः द्वाभ्यां किं क्रियते अत्याह

भुवनत्रयसंबन्धाद्विधात्वं तु महेश्वरि ।

भुवनत्रयं लोकत्रयं तत्संबन्धात् लोकत्रयाधारत्वात् आधाराधेयभावः संबन्धः तस्मात् संबन्धाद्धेतोः पृथिव्याः त्रित्वं तेन पृथिवीभागत्रयगतगन्धत्रयलक्षकं लकारत्रयमित्यर्थः ॥ [हकाराद्व्योम संभूतं ककारात्तु प्रभञ्जनः इत्येवं वाचकतया उक्तस्यापि ककारस्य प्रमातृवाचकत्वेनापि पूर्वकत्वात् अन्यैरक्षरैः स्पर्शचतुष्टयं लक्षयित्वा इदानीं ककारत्रयेण प्रमातृत्रयं लक्षयति

अशुद्धशुद्धमिश्राणां प्रमातॄणां परं वपुः ।
क्रोधेशान्वितयेनास्य विद्यास्थेन प्रकाश्यते ॥

अशुद्धाः प्रमातारो भेदधीमात्रसाराः शिवाहंभा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वभावनाः सकलाः पशवः तदुक्तं स्वच्छन्दसंग्रहे

"पशवस्त्रिप्रकाराः स्युस्तेष्वेके सकलाः ~~पशवः~~ मताः
प्रलयाकलनात्मानस्तेषां केचिन्महेश्वरि ॥
विज्ञानकेवलास्त्वन्ये तेषां रूपं क्रमात् शृणु ।
अनादिमलसंच्छिन्नो मायाकर्मावृतो विभुः ॥
शरीरी शिवतत्त्वज्ञो भेदैकरसिको लघुः ।
सर्वदा कर्मकर्ता च स्वकर्मफलभोजकः ।
नित्यं विषयसंरक्तो भाव्यः शोच्यः पुमानयम् ।"

इति । शुद्धाः प्रमातारः पक्वमलविज्ञानाः शिवता~~मा~~त्रसाराः विज्ञानकेवलाः पशवः । तदुक्तं स्वच्छन्दसंग्रहे

"मलमात्रेण संच्छिन्नः पशुर्विज्ञानकेवलः ।
सुपक्वमलविज्ञानकेवलः स स्वयं प्रिये ॥
सुतीव्रशक्तिपातेन कुरुते तांश्च केवलान् ।"

इति । मिश्राः प्रमातारः पुर्यष्टकसूक्ष्मशरीरमात्रसंबन्धाः प्राक्स्वस्वकर्मानुभवार्थमनेकयोनिषु संभूय तत्कर्मानुभवेन कर्मद्वयसाम्ये सति सुपक्वमलकर्माणः गुरुं विना शिवानुग्रहशालिनः क्रियाज्ञानसाधारणाः प्रलयाकलाः पशवः । तदुक्तं स्वच्छन्दसंग्रहे

"प्रलयाकलसंज्ञकः ।
पुर्यष्टकशरीराश्च स्वस्वकर्मवशात् प्रिये ॥
सर्वयोनिषु संप्राप्य भोगाद्यर्थं स्वकर्मणाम् ।
भुक्त्वा भोग्यानि तेषां तु कर्मसाम्ये शिवः स्वयम् ॥
सुपक्वमलकर्माणस्तान् किंचिदनुगृह्य च ।
जलतत्त्वादितत्त्वानां मध्ये लोकेश्वरस्त्रिधा ॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति एवं त्रिविधानां ब्रह्मातॄणां वपुः स्वरूपं परमन्यत क्रोधे-
शान्वितयेनेत्यनेन श्रीकण्ठन्यासपरिपाट्या क्रोधेशः ककार-
त्रितयेन विद्यास्थेन बीजत्रयेण प्रकाश्यते व्यज्यते। कोऽर्थः—बीजत्रयगतककारत्रयेण सकलविज्ञानकेव-
लप्रलयाकलाख्यत्रिविधपशुरूपान् शुद्धाशुद्धमिश्रत्रया-
तॄत्रयस्वरूपं व्यज्यते इत्यर्थः।

पूर्वं विद्यास्थक्रोधेशान्वितयेन ब्रह्मातॄत्रयं लक्षयित्वा
इदानीं विद्यास्थश्रीकण्ठद्वादशान्तमध्ये आद्यदशाकेना-
व्यक्तमनन्तरेण प्राणं चरमेशं च लक्षयति

श्रीकण्ठदशार्कं तद्वदव्यक्तस्य हि वाचकम् ।
प्राणो भूतस्थितो देवि तद्वदेकादशः परः ॥

श्रीकण्ठदशार्कं हृल्लेखात्रयवर्जितहकारादिद्वादशार्णाक्षरो-
परिगतानाम् अकारार्णं मध्ये श्रीकण्ठदशार्कं, श्रीकण्ठा
अकाराः तेषां दशार्कम् अव्यक्तो जीवो नादिमलसंच्छन्न-
तया स्वमलशिवत्वापरिज्ञानकारणेन्द्रियादिजडवर्गोत्पा-
तितया केवलचिन्मात्रतया विन्यस्तः। तदुक्तम्

"अनादिमलसंच्छन्नो मायाकर्मवृतो विभुः ।
पशूनां शिवतत्त्वज्ञो भेदैकरसिको लघुः ॥"

तस्य वाचकम्

"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः।"

इति संकेतपद्धत्युक्तरीत्या अकारवाच्यः परमशिवः परम-
शिवांशत्वात् तद्वत् परमशिववत् यथा परमशिवोऽका-
रवाच्यः तथा तदङ्गभूतो जीवोऽपि अकारेणोच्यते इत्यर्थः।
तद्वत् जीववत् यथा शिवांशो जीवः परमशिववाचकः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रीकण्ठेन लक्ष्यते तद्वज्जीववत् एकादशाश्च श्रीकण्ठो जीवाधारभूतः प्राणरूपः प्राणस्य निरूपकः स्थितः प्राणो हि जीवस्याधारः प्राणेन विना जीवस्यानवस्थानात् परः परो द्वादशाः श्रीकण्ठः पुरुषः पुरुषस्य वाचकः विश्वस्य प्राणात् परमशिवः। तदुक्तं चिद्गगनचन्द्रिकायाम्

"विश्वप्रसूनि शिवात्मनीश्वरे
पूरणात् पुरुषतामुपेयुषि।
ये मनः प्रणिदधुर्महर्षय-
स्तान् पतञ्जलिमुखानुपास्महे॥"

इति। "पुरुष एवेदं सर्वम्" इति श्रुतिः॥

ननु श्रीकण्ठद्वादशाकं विद्यायां विद्यते एकेन शिवः कथ्यते एकेन जीवः एकेन प्राण इति त्रिभिरेवालं किमन्येरित्यत आह

एकः सन्नेव पुरुषो बहुधा जायते हि सः॥

सत्यम् एकेन पुरुषः कथ्यते, द्वाभ्यां जीवप्राणौ, तथापि स एकः सन्नेव "एकमेवाद्वितीयं ब्रह्म सच्चासच्चाभवत्" इत्युपक्रम्य निगदेन, रीत्या सद्रूपः एको हि पुरुषो बहुधा जायते हि-शब्दः प्रसिद्धौ अस्मिन्नर्थे प्रमाणं "इन्द्रो मायाभिः पुरुरूप ईयते"। "एक एव हि भूतात्मा भूतेषु हि व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥"

इति सत्यम् एक एव शिवो भवति जीवप्राणान्मना बहुधा विभिन्न इत्युमेवार्थं द्योतयितुं विद्यायां बहवः श्रीकण्ठाः स्थिता इत्यर्थः॥

अक्षराणां हि [illegible] बिन्दुनादादीनां वासनामाह

हृद्वेश्वरसदेशाख्या देवतामितविग्रहाः।
बिन्दुत्रयेण कथिताः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रुद्रस्तेजोऽधिपतिः तेजस्तत्त्वस्वान्तर्भूतं पुरुषरागविद्यानि-
यतिकालकलामायान्तम् । तदुक्तं स्वच्छन्दसंग्रहे
"पुरुषादिकमायान्तं तेजस्तत्त्वं महेश्वरि ।"
इति । ईश्वरसदाशिवौ वायुतत्त्वात्मकौ । तदुक्तं तत्रैव
"विद्या चेश्वरसदाख्यौ वायुतत्त्वं समीरितम् ॥"
इति । अतो रुद्रेश्वरसदेशाख्या देवता मितविग्रहाः परिच्छि-
न्नरूपाः । तदुक्तमत्रैव
"यत्सदाशिवपर्यन्तं विनाशोत्पत्तिसंयुतम् ।"
इति । बिन्दुत्रयेण कथिताः बिन्दुत्रयं बीजशिखरवर्ति-
कामकलोर्ध्वगतानां बिन्दूनां त्रितयम् ॥

अमितामितविग्रहाः ।

शान्तिः शक्तिश्च शंभुश्च नादत्रितयबोधनात् ॥

शान्तिरव्यक्तध्वनिलक्षणो नादोऽखिलं जगदधरीकृत्य
यत्र लयमेति स ब्रह्मरन्ध्रावसानभूमिः ऊर्ध्वशक्तीनां प्र-
शान्तिस्थानहेतुत्वात् । तदुक्तं स्वच्छन्दसंग्रहे
"नाड्याधारस्तु नादान्तो भित्त्वा सर्वमिदं जगत् ।
अधः शक्त्या विनिर्भिद्य ऊर्ध्वशक्त्यवसानकः ॥
नाड्या ब्रह्मबिले लीनस्त्वव्यक्तध्वनिलक्षणः ॥"
इति । शक्तिः ऊर्ध्वशक्तिः उपरिगतं शक्तितत्त्वं । तदुक्तमत्रैव
"ब्रह्माणी त्वपरा शक्तिर्ब्रह्मणोत्सङ्गगामिनी ।
द्वारं सा मोक्षद्वारस्य रोधयित्वा व्यवस्थिता ॥
तां भित्त्वा तु वरारोहे ऊर्ध्वशक्तिं परां शिवाम् ।
शक्तितत्त्वात्मिकां देवीं प्रसुप्तभुजगाकृतिम् ॥
शक्तितत्त्वसमाख्यातं भुवनैराश्रितं महत् ॥"
इति । शंभुः शिवः शिवतत्त्वं शक्तितत्त्वोपरिस्थितम् । तदुक्तमत्रैव

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"शिवतत्त्वं समाख्यातं तदूर्ध्वं शक्तितत्त्वतः ।"
इति। अमिता मितविग्रहाः अत एवानन्ताः अपरिच्छिन्नरूपाः व्योमतत्त्वान्तर्गतत्वात्। तदुक्तं तत्रैव
"शिवतत्त्वं शिवो व्योमनादत्रितयबोधना ।"
वाग्भवकामराज शक्तिबीजोपरिगतबिन्दुत्रयोपरिगतरोधिनीतिश्रितयोर्ध्वभागगतानां नादानां त्रयं एषां क्रमेण बोधकं लक्षकं ते नादत्रितयबोधनाः, वाग्भवबीजोपरिगतबिन्दूपरिवर्तिना नादेन शक्तिः, तार्तीयबीजशिखरवर्तिना नादेन शिवो व्यज्यते इत्यर्थः ॥
पूर्वं बिन्दुनादवासनासुक्ता इदानीं सर्वमन्त्रमयवासनासमपि सोदाहरणमाह

वागुरा मूलवलये सूत्राद्याः कवलीकृताः ।
तथा मन्त्राः समन्त्राश्च विद्यामात्र संस्थिताः ॥

वागुरा मृगबन्धनी अत्र तु वागुराशब्देन मत्स्यग्रहणहेतुर्जालं लक्ष्यते प्राणिग्रहणसाम्यात् अन्यथा मूलवलय इत्यनुपपन्नं स्यात् मृगबन्ध्या मूलवलयसम्भवात् रज्जुनिर्मितत्वात् सूत्रादीनामप्यसम्भवात्। सूत्राद्याः सूत्राणि तन्तवः। अत्र आद्यशब्दात् जालग्रन्थे आयसगुलिकाः श्रोता गृह्यन्ते यथा लोहादिमये वलये जालावयवानां तन्तूनां मूलं कथितं, तथा समस्तमन्त्राणां मूलभूतायां वैखरीविद्यायामस्यां विश्रान्ताः अतो विद्यायामत्र समस्तमन्त्राः स्थिता इत्याहुः ॥
गुरूपदेशक्रमेणायमर्थः संप्राप्यते इत्याह

गुरुक्रमेण संप्राप्तः संप्रदायार्थ ईरितः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गुरुक्रमः पारम्पर्यक्रमः तदुपदेशक्रमेणैव

"शिवादिविग्रहात् पूर्णात् सर्वकारणकारणात् ।
ध्वनिरूपं परं सूक्ष्मं शुद्धं धवलतेजसम् ॥
वाग्रूपं प्रसृतं तत्त्वमुन्मनाप्राक्तिकेवलम् ।
अव्यक्तं व्यक्तरूपेण निष्कलं कर्मकारणात् ॥
परानन्दस्वरूपं तत् स्वच्छन्दादिप्रभेदतः ।
अनुष्टुपृच्छन्दसा बद्ध्वा प्राह स्वच्छन्दभैरवः ॥
तद्विसृष्ट्य प्रपञ्चेन श्रीवाचानाश्रितेश्वरः ।
तत्सर्वं शास्त्रमतीतांशो कथितं बहुविस्तरम् ॥
तदेतत् पररूपेण सादाख्येन शिवेन तु ॥
मन्त्रसिंहासनस्थेन पञ्चमन्त्रशरीरिणा ॥
कौलिकादिषु सिद्धान्तपूर्णाद्यखिलमागमम् ।
साधनं पुरुषार्थस्य कौलिकं चातिकौलिकम् ॥
असंख्यमप्रमेयं च शिवेन कथितं पुरा ।
तज्ज्ञानमीश्वरे दत्तमीश्वरेण शिवेच्छया ॥
विद्यायामादितो दत्तं विद्येशेषु च तत्त्वतः ।
विद्येश्वरेण दत्तं तज्ज्ञानं नियमिकं क्रमात् ॥
दत्तं रुद्रेभ्य एतच्च गुणतत्त्वेश्वराय च ।
श्रीकण्ठाद्येश्वरेणैव दत्तं तेन ततः परम् ॥
श्रीकण्ठेन प्रदारादि दशाहद्वात्रिकं क्रमात् ।
दीक्षयित्वा विधानेन दत्तं वै ज्ञानमम्बिके ॥
दीक्षयित्वाभिषिच्याथ श्रीकण्ठेन ममापि च ।
दत्तं श्रीदक्षिणं सर्वं सर्वकामार्थसाधनम् ॥"

इति स्वच्छन्दभैरवोक्तनीत्या मयोदितः विषमपदैः सं-
प्रदायविद्भिरपरिज्ञातार्थैः श्लोकैः पूर्वोक्तरीत्या कथितः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संप्रदायार्थः विना गुरूपदेशं व्युत्पत्तिबलेन पुराणादिश्लोकैः यत् ग्रहीतुमशक्य इत्यर्थः ॥

अथ क्रमप्राप्तं निर्गर्भार्थमाह

निर्गर्भोऽपि महादेवि शिवगुर्वात्मगोचरः ।

निर्गर्भोऽपि निर्गर्भार्थः शिवो वाङ्मनसगोचरः सकलनिष्कलत्वादिगुणरहितः तादृशः स्वात्मतया वक्ष्यमाणोऽपि विदिताखिलागमार्थो गुरुः तादृशगुरुकरुणालाभविगलितसकलपाशविशदः चिद्रूपानुभव आत्मा शिष्यः तदुक्तं स्वच्छन्दसंग्रहे

"तत्त्वातीतं वरारोहे वाङ्मनोऽतीतगोचरम् ।
सुनिष्कलं वा सकलं नीरूपं निर्विकल्पकम् ॥
निर्द्वन्द्वं परमं तत्त्वं शिवाख्यं परमं पदम् ।
इति सर्वविदाचार्यो मोक्षधर्मपरायणः ॥
गुरुवक्त्रप्रयोगेन पशुं तत्रैव योजयेत् ॥"

इति । गुरुः

"— गृणते तत्त्वमात्मीकृत्य जगत्त्रयम् । मात्मीय
उपायोपेययोगेन शिवाय गुरवे नमः ॥"

इत्येवंविधशिवगुर्वात्मगोचरानुसंधानात्मको लौकिको निर्गर्भार्थः इत्यर्थः ॥

ननु केन शिवगुर्वात्मनां प्रकारेणैक्यमनुसंधीयते इत्याह

तत्प्रकारं च देवेशि दिङ्मात्रेण वदामि ते ।

तत्प्रकारं शिवगुर्वात्मनाम् ऐक्यानुसंधानात्मकं दिङ्मात्रेण निर्देशमात्रेण वदामि नाशेषविशेषप्रतिपादनप्रपञ्चेनेत्यर्थः ॥

तत्प्रकारमाह

निष्कलत्वं शिवे बुद्ध्वा तद्रूपत्वं गुरोरपि ।
तन्निरीक्षणसामर्थ्यादात्मनश्च शिवात्मताम् ॥
भावयेद्भक्तिनम्रः सन् शङ्कोन्मेषाकलङ्कितः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कला अवयवा निष्कलत्वं निरवयवत्वं शिवे पूर्वोक्त-
लक्षणे बुद्ध्वा "गृणते तत्त्वमात्मीयम्" इत्याद्यभियुक्तव-
चनोक्तरीत्या निष्कलं निखिलात्मकं शिवं स्वात्मतया
वीक्षमाणस्यैव गुरुत्वात् गुरोरपि तद्रूपत्वं शिवात्मकत्वं
बुद्ध्वा तन्निरीक्षणसामर्थ्यात् गुरोराज्ञापालनेन केवलं
निष्प्रपञ्चमेव निरीक्ष्यैतादृशाद्वैतचिदम्भोधिसुधाद्रवी-
भूततया विशुद्धः शिष्यस्तु लीयते "आनन्दचिद्घन" इत्या
दिवाक्योक्तरीत्या गुरोर्निरीक्षणं निखिलपाशच्छेदन-
मागर्ह्यसामर्थ्यवशात् सामर्थ्यात् विशुद्धः शिष्यो भक्ति-
नम्रः प्रत्युत्पन्नपरशिवाहंभावभावनावेशः प्रत्यहमान-
न्दनैरन्तर्यपट्वाभ्यासवशात् शङ्कोन्मेषाकलङ्कितः
शङ्कासंकोचः संसारित्वाभिमानः तस्योन्मेषः पुत्र-
भार्यादिबाह्यार्थाभिनिवेशः तेनाकलङ्कितः विगता-
हंममताभिमानः आत्मनश्च शिवात्मतां भावयेत् ज-
पाकुसुमसामीप्यविगमात् स्फटिकस्य नैर्मल्यमिव अद्वै-
तभावनाभावितगुरुकटाक्षपातपाटितपाशपटलः परि-
पूर्णं स्वकं पश्येदित्यर्थः ॥

अनन्तरं क्रमप्राप्तं कौलिकार्थमाह

कौलिकं कथयिष्यामि चक्रदेवतयोरपि ॥
विद्यागुर्वात्मनामैक्यम् ॥

कौलिकं कौलिकाख्यमर्थं कथयिष्यामि चक्रदेवता-
गुरुविद्यासाधकानाम् ऐक्यानुसंधानं कौलिकोऽर्थः इत्यर्थः।
अक्षरार्थः स्पष्टः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्त्वकारमाह "तत्त्वकारः प्रदर्श्यते" ॥

इत्यादि "इत्येवं कौलिकार्थस्तु कथितो वीरवन्दिते ।" इत्यन्तेन ॥

आदौ विद्याचक्रयोरैक्यमाह

लकारैश्चतुरश्राणि वृत्तत्रितयसंयुतम् ।
सरोहहृदयं भूतैरग्नीषोमात्मकं प्रिये ॥

लकारैः विद्याबीजत्रयगतैः चतुरश्राणि भूगृहाणि "पृथिवीमण्डलं पीतं चतुरस्रं सुशोभनम्" इति स्वच्छन्दसंग्रहोक्तरीत्या भूमण्डलस्य चतुरस्रहूपत्वात् भूतत्त्ववाचकैर्लकारैः चतुरस्रत्रयं जातमित्यर्थः । तदुक्तं चतुःपीठीशास्त्रे "सादनं तदधः शक्तिरिति" हंसपारमेश्वरेप्युक्तम्

"शिवो हकार इत्युक्तं सकारे शक्तिरव्यया ।"

इति भूतैर्लकारैः वृत्तत्रयसंयुक्तं सरोहहृदयं चतुरश्रान्तरे एकं वृत्तं तहृत्तान्तः षोडशदलं सोमात्मकं पद्मं तदन्तश्च अष्टदलं पद्ममग्न्यात्मकम् एवं वृत्तत्रयसमन्वितमग्नीषोमात्मकं सरोहहृदयं जातमित्यर्थः ॥

हृल्लेखात्रयसंभूतैरक्षरैर्नवसंख्यकैः ।
बिन्दुत्रययुतैर्जातं नवयोन्यात्मकं प्रिये ॥

"जलबिम्बं सुवृत्तं वै श्वेतं च पद्मलाञ्छितम्" इति स्वच्छन्दसंग्रहोक्तरीत्या जलबिम्बस्य पद्मद्वयं पद्मकलाञ्छितवृत्तहूपत्वात् जलतत्त्ववाचकैः सकारैर्वृत्तत्रयसंयुक्त-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षड्द्वयं जातं अधुना हृल्लेखात्रयसंभूतैः बीजत्रयगत-हृल्लेखात्रयावयवगतैरक्षरैः हकारेफेकारवर्यैः बिन्दुत्रयगतैः नवसंख्यात्मकैः नवयोन्यात्मकं चक्रं जातमित्यर्थः॥

ननु षड्द्वयानन्तरं चतुर्दशारद्वयात्मकं चक्रत्रयस्य कथने युक्ते किमिति तदुल्लङ्घ्य नवयोनिचक्रं कथितमुच्यते, नवयोनिचक्रस्योपरिष्टात् प्रस्तारे कृते तिसृभिः शक्तिभिः वह्निभिश्च द्विदशचतुर्दशकोणात्मकं जातं ततो नवयोनिचक्रानन्तरमेतच्चक्रत्रयमुच्यते इत्येतत्सर्वं मनसि निधायाह

मण्डलत्रयसंयुक्तं(तु)चक्रं शक्त्यनलात्मकम्।
व्योमबीजत्रयेणैव

मण्डलत्रययुक्तं वृत्तत्रयान्तर्गतं शक्त्यनलात्मकं चक्रं नवयोनिचक्रस्योपरिष्टात् प्रस्तारे कृते सति तिसृभिः तिसृभिः शक्तिभिरनलैश्च त्रिभिर्निघ्नत्वात् द्विदशार-चतुर्दशारकोणात्मकं चक्रत्रयं व्योमबीजत्रयेणैव हकारत्रयेणैव हकारस्य व्योमवाचकत्वात् हृल्लेखात्रये हकारत्रयं गते शिष्टेन हकारत्रयेण चतुर्दशारादि-चक्रत्रितयं जातमित्यर्थः॥

त्रिमातृत्रितयान्वितम्।
इच्छाज्ञानक्रियारूपं मादनत्रयसंयुतम्॥
महाशिवासनं देवि महाबिन्दुत्रयं परम्॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रमातारस्त्रिविधा उक्तरूपा अशुद्धशुद्धमिश्रात्मानः तेषां त्रयेणान्वितं पञ्चात् शिवानुग्रहतो मलकर्मविपाकात् पृथिव्यप्तेजोवाय्वधिपतितासादनेन तत्तत्समष्टितया हतं प्राप्तं। तदुक्तं स्वच्छन्दसंग्रहे

"मलादीनामपाके तु सामान्यानुग्रहो भवेत्।
आधिकारिकमैश्वर्यं शिवानुग्रहमाश्रितः॥
पशवस्त्रिप्रकारास्तु प्राप्नुयुः परमेश्वरि।
अपक्वमलकर्मभ्यस्तान् किंचिदनुगृह्य च॥
जलतत्त्वादितत्त्वानां मध्ये लोकेश्वरस्त्रिधा।"

इति। "इच्छाज्ञानक्रियारूपं सादनत्रयसंयुतम् इच्छाज्ञानक्रियाप्रधानप्रमातृत्रयनिरूपकाणां सादनान्तं ककाराणां त्रयेण संयुतं मिश्रितं सदाशिवासनं पृथिव्यादिवायुतत्त्वान्ताधिपतिभिः ब्रह्मविष्वीशरुद्रैश्चतुर्भिः पादरूपेण युतं पञ्चभूतात्मकांघ्र्यधिपतिसदाशिवरूपपञ्चमासनं महाबिन्दुसंज्ञं परम्

"परशिवरविकरनिकरे प्रतिफलति विमर्शदर्पणे विशदे।
प्रतिरूपचिरे कुड्ये चित्तमये निविशते महाबिन्दुः॥"

इति कामकलाविलासोक्तरीत्या परशिवप्रतिबिम्बमहाबिन्दात्मकं परमुत्कृष्टं शिवशक्त्योरधिवासयोग्यत्वात्। तदुक्तं ज्ञानदीपविमर्शिन्यां "उड्डियानपीठकदम्बवनान्तः श्रीमच्चदेवताचतुष्कादत्वेन श्रीमदर्धचतुष्कादधःस्थेन तं पृथिव्यधिपतये ब्रह्मणे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नमः वां अबधिपतये विष्णवे नमः रां तेजोधिपतये रुद्रा-
य नमः यां वाय्वधिपतये ईशानाय नमः एतानभ्यर्च्य
हां आकाशाधिपतये पञ्चवक्त्रसदाशिवमहाप्रेतपद्मास-
नाय नमः इति मञ्चिकाशिवमभ्यर्च्य ।"

इति मन्त्रमयं चक्रं देवतायाः परं वपुः ॥

इत्थमुक्तप्रकारेण मन्त्रात्मकं चक्रम् इदानीं चक्रेण दे-
वताया ऐक्यमाह देवतायाः परं वपुः चक्रदेवतायाः
परमन्यत् वपुः "ततः पद्मनिभां देवीमि"त्यत्र देवतायाः
करचरणादिमद्वपुरुक्तं तदेव त्रिकोणादिगृहान्तः
श्रीचक्रपदनिवास्यावरणदेवतारूपेण अवयवशो
विभज्य बैन्दवासनास्वसंविद्देवताश्रीचक्रपरवपुषा
स्थितेत्यर्थः । तदुक्तमत्रैव

"एवं रूपं परं तेजः श्रीचक्रवपुषा स्थितम्
तदीयशक्तिनिकरस्फुरदूर्मिसमावृतम् ॥"

इति ॥

एतदेवोपपादयति

एकादशाधिकशतदेवतात्मतया पुनः ।

एता एकादशोत्तरशतदेवताः त्रिकोणाग्रदक्षवा-
मकोणेषु कामेश्वर्यादिकास्तिस्रः, तद्बहिरष्टकोणान्त-
राले त्रिकोणान्विते चतुर्दिक्षु अष्टौ कामेश्वरकामे-
श्वर्यायुधदेवता अष्टकोणे अष्टौ वशिन्याद्या अष्टदेव
ताः, अष्टकोणान्तराले षडङ्गदेवताः षट्, अन्तर्दशा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

१कोणे सर्वज्ञाद्या दश देवताः, द्वितीयदशारे सर्वसि-द्धिप्रदाद्या दश देवताः, चतुर्दशारे सर्वसंक्षोभिण्या-द्याः चतुर्दश, अष्टदले ऽष्टानङ्ककुसुमाद्याः, षोडशदले कामाकर्षिण्याद्याः षोडश, अन्तश्चतुरस्रे मुद्रादेवता दश, मध्यचतुरस्रे ब्राह्म्याद्या अष्ट, बाह्यचतुरस्रे च-लिमाद्या दश, एवमेकादशोत्तरषष्ठतदेवतात्मतया समाकारभूतश्रीचक्ररूपिणी श्रीचक्रदेवतेत्यर्थः।

नन्वयं कौलिकार्थो वामकेश्वरतन्त्रोक्तः सूचितः इत्याशङ्कां परिहरन् देवतागुरुशिष्याणामेव गणेशो-त्थत्वसूचितं कौलिकार्थं विवृणोति

एकादशाधिकषष्ठतदेवतात्मतया पुनः।

पुनःशब्दादेकादशाधिकषष्ठतदेवतात्मतया एत-स्य "गणेशत्वं महादेव्या" इत्यनेनापि काकाक्षिवद-न्वयः। पूर्वोक्तत्रिकोणद्विचतुरस्रान्तश्रीचक्रपदानि वा सैकादशाधिकषष्ठतदेवतात्मतया

गणेशत्वं महादेव्याः ससोमरविपावकैः।
इच्छाज्ञानक्रियाभिश्च गुणत्रयवपुषैः पुनः॥
ग्रहरूपा तु सा देवी

महादेव्यास्तु तत्संख्याकदेवतासमूहो गणो देव्याः सोमरविपावकनेत्ररूपेण स्थिताः इच्छा

"इच्छा शिरःप्रदेशस्था ज्ञानं च तदधोगतम्।
क्रिया पादगता तस्याः॥"

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry